Vedavyas

Sripadmapuranam antargata puru-
, sottammas mahatmayam

श्रीपाद्म पुराणांतर्गत पुरुषोत्तममास माहात्म्य

Sanskrit

Paper – Printed

1953 Sambat (122 years old)

23 Falio

14.4" x 7"

Complete

॥ अथ श्रीपाद्मं महापुराणं प्रारभ्यते ॥

श्रीः।

प्रस्तावना.

अद्य खलु महानानन्दो बोभवीति निखिलभव्यजनानामग्रे निवेदयितुम्। यदनादिपरमेश्वरो निजेच्छया जगदुत्पाद्य तस्य शिक्षाप्रवृत्तये वेद शास्त्रं प्रावर्तयत्। यस्य शासनेन प्रजाः स्वकर्तव्यकर्माणि यथावच्चरित्वाऽऽत्मनो जन्मनःसार्थक्यंचक्रुः। ततो गतेषु बहुषु युगेषु प्रचलितेच वैदिक धर्मे, कलिदोषेण मन्दबुद्धयो जना उत्पत्स्यन्तीति विचार्य परमकारुणिकेन भगवता व्यासावतारं धृत्वा वेदार्थोपबृंहणाय महाभारतमष्टादश पुराणान्यष्टादशोपपुराणानिच निरमीयंत। तानि ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कंडेयमाग्नेयं भविष्यं ब्रह्मवैवर्तं लैङ्गं वाराहं स्कांदं वामनं कौर्मं मात्स्यं गारुडं ब्रह्माण्डंचेत्येतानि महापुराणानि सकलवेदभाष्यभूतानि विस्तरेण दृष्टांतदार्ष्टांतिककथाप्रकथनेन वेदार्थमुपबृंहयंति। एवमेवान्यानि नारसिंहसांबसौरकालीपुराणप्रभृतीन्युपपुराणानि च महापुराणानुगतार्थान्येव प्रायः प्रवर्तितानि। एतेषां सर्वेषामपि पुराणानां सर्गप्रतिसर्गवंशमन्वंतरवंशानुचरितानि मुख्या विषयाः, तदनुसारेणानेकविधतीर्थक्षेत्रगिरिनदिवनपुराणां देवर्षिगंधर्वादीनांच सविस्तरं कथावर्णिताःसंति। तत्तत्कथाप्रसंगेन च यमनियमभक्तिनीतयो वर्णाश्रमधर्मामोक्षधर्मादानधर्माश्च सविस्तरं निरूपिताःसन्ति। येषां सेवनेन सर्वेषामैहिकामुष्मिकनिरातिशयसुखावाप्तिपूर्वकं मोक्षसुखंकरगतं भवेन्मनुजजन्मनःसाफल्यंच भवेत्। इत्थमेतानि महापुराणान्युपपुराणानि महाभारतं च भगवता वेदव्यासेन विनिमाय मुक्तिसोपानश्रेणीव भूतले सुविस्तृतास्ति। यस्याआश्रयेण धर्मावलम्बनद्वाराऽनायासतो मोक्षमन्दिरमधिरुह्युः। सोऽयंभगवतो वेदव्यासस्यास्मासुसांसारिकजनेषु भूयानेवानुग्रह इति सर्वेऽपि विचक्षणाःशिरसा स्वीकरिष्यंति निःसंशयमिति सर्वत्र सुविदितमंतोऽलंतद्विषयकविशेषोल्लेखनेनेति प्रकृतं प्रस्तूयते।

एतानिच महापुराणानि सांप्रतं क्वचित्क्वचित्कतिचिदुपलभ्यंते। तत्रापि क्वचित्कानिचित्पूर्णानि कानिचिदपूर्णानिप्रायोऽशुद्धपाठबहुलानि लेखकप्र

प० पु० ॥ १ ॥

सू० प्र०

मादाकुलान्युपलभ्यंते । तान्यस्माभिर्महता परिश्रमेण बहुलद्रव्यव्ययेनच संगृह्य शास्त्रिजनद्वारा प्रत्येकैकपुराणपुस्तकानि चतुःपंचादर्शपुस्तकसा
हाय्येन शोधयित्वामुद्रयित्वा प्रकाशयितुमुपक्रांतानि।तन्मध्ये श्रीमद्भागवत-ब्रह्मवैवर्त-मार्कण्डेय-कालिकापुराणादयःकतिचित्पुराणग्रंथा अस्माभिःपू-
र्वव्यवस्थया मुद्रयित्वा प्रकाशिताः सन्त्येव । संप्रतिचैतत्पाद्ममहापुराणं महतापरिश्रमेण भूयसा द्रव्यव्ययेनच मुद्रयित्वा प्रकाशितमस्ति । अस्य
महापुराणस्य प्राचीनादर्शपुस्तकानि भोरसंस्थानश्रीमहाराजानां बडोदासंस्थानश्रीमहाराजानां बाबासाहेब पौराणिकानां, काश्मीरदेशीयपण्डि-
तानां च प्राचीनपुस्तकसंग्रहालयेभ्यआदर्शपुस्तकान्यानीयशास्त्रिणां सविधे दत्तानि । तैश्च तेषांपुस्तकानामाधारेणैतत्पाद्मपुराणं संशोधितम् ।
तत्रास्य सृष्टिखण्डं, तिरुपतिस्थश्रीरङ्गाचार्यस्वामिभिःसंशोधितम् । भूमि खण्डं २ पातालखण्डं ४ क्रियायोगसारखंडं ७ चेत्येतानि रावेरग्रामवा-
सिगोविन्दशास्त्रिभिःसंशोधितानि। स्वर्गखंडं ३ ब्रह्मखण्डम् ४ उत्तरखंडंचेत्ये तानि वांईक्षेत्रस्थैरुद्धवाचार्यैश्चसंशोधितानि । एतच्छोधनावसरेचादर्श
पुस्तकावलोकनेऽन्येषां बहूनांशास्त्रिणां साहाय्यमासीत् । एवं व्यवस्थयैतत्पाद्ममहापुराणं संशोध्य पाठभेदैर्विशेषविषयसूचकटिप्पणीभिश्च समलं
कृत्य समानीतानि । तानिमया स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा समग्रं पुस्तकं प्रकाशमानीताम् । अभ्यर्थयेच विद्वदग्र्यान्-एत
दलभ्यंमहापरिश्रमपरिष्कृतंश्रीपाद्ममहापुराणं संगृह्य पठनश्रवणादिभिःसंशील्यतदुक्तधर्मकर्माचरणेनकृतार्थयंत्वात्मनोजन्मेति । अन्येव्यापारिणोऽ
पिजानंतु । एतत्पुस्तकं १८६७ तमवार्षिक २५ शनियमानुसारेण राजपट्टारूढीकृतमस्ति । अतःकिमपि साहसं न कर्तव्यमिति.

खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" छापाखाना-मुंबई.

॥ श्रीः ॥

अथ पद्मपुराणस्थविषयानुक्रमणिका प्रारभ्यते ॥

इति पद्मपुराणांतर्गतसृष्टिखण्डस्यविषयानुक्रमणिका संपूर्णा ॥ १ ॥

॥ अथ द्वितीयभूमिखण्डस्थविषयानुक्रमणिका ॥

अ० प० विषयाः

इतिपाद्मपुराणान्तर्गतभूमिखंडस्थविषयानुक्रमणिका संपूर्णा ॥ २ ॥

॥ अथ तृतीयस्वर्गखंडस्थविषयानुक्रमणिकाप्रारंभः ॥

अ०	प०	विषयाः
१५—	१०	हरस्यप्रेरणया वह्निना त्रिपुरदहनम्, बाणासुरेण शिवस्तोत्रकरणोत्तरं शंकरेण बाणासुरायवरप्रदानम्, दग्धयोः पुरयोर्मध्यादेकस्य पुरस्य श्रीशैलेपातनम्, द्वितीयस्यामरकंटकेपातनम्, अमरकंटकपतितपुराज्ज्वालेश्वरोत्पत्तिः, तन्माहात्म्यं च. श्लो० ८२ ॥
१६—	११	कावेरीनर्मदासंगममाहात्म्यवर्णनम्, तत्रकुबेराख्यानम्. श्लो० १९॥
१७—	१२	नर्मदोत्तरतीरस्थपत्रेश्वरतीर्थमाहात्म्यम्, गर्जनमेघरावब्रह्मावर्त्तांगारेश्वरकपिलातीर्थकांचीतीर्थकुंडलेश्वरपिप्पलेश्वरविमलेश्वरपुष्कारिणीमाहात्म्यपूर्वकनर्मदास्तोत्रकथनम्. श्लो० २२ ॥
१८—	१२	शूलभेदतीर्थभीमेश्वरतीर्थादित्येश्वरमल्लिकेश्वरवरुणेश्वरनीराजेश्वरकोटितीर्थागस्त्येश्वररविस्तवशक्रतीर्थर्षितीर्थनारदतीर्थदेवतीर्थामरकंटकतीर्थवामनेश्वरद्वितीयर्षितीर्थवटेश्वरभीमेश्वरवारणेश्वरसोमतीर्थपिंगलेश्वरसुरभिकेश्वरनारकेश्वरकोटिकेश्वरगंगावतरणनंदितीर्थद्वीपेश्वरव्यासतीर्थैरंडीतीर्थैक्षुनदीसंगमतीर्थस्कंदतीर्थांगिरसतीर्थलांगलतीर्थवटेश्वरसंगमेश्वरभद्रतीर्थांगारेश्वरायोनिसंगमपांडवेश्वरकंबोतिकेश्वरचन्द्रभागाशक्रतीर्थब्रह्मावर्ततीर्थकपिलतीर्थनर्मदेश्वरतीर्थादित्यायतनतीर्थमासेश्वरनागेश्वरतपोवनकुबेरभवनकालेश्वरतीर्थमरुत्तालयनारदतीर्थाहल्यातीर्थसोमतीर्थस्तंभतीर्थयोधिनीपुरस्थविष्णुतीर्थतापसेश्वरामोहकतीर्थसिद्धेश्वरगणपतिलिंगजनार्दनकामतीर्थांधोनतीर्थसिद्धेश्वरक्षेत्रपालदंडपालकुसुमेश्वरमाहात्म्यवर्णनम्. श्लो० १२२ ॥
१९—	१४	भार्गवेश्वरतीर्थमाहात्म्यम्, शुक्लतीर्थोत्पत्तिवृत्तांतमाहाम्यवर्णनम्. श्लो० ३६॥
२०—	१५	नरकतीर्थास्थिविलयतीर्थगोतीर्थकपिलातीर्थर्षितीर्थगंगावदनतीर्थगंगाराह्वर्कसंगमदशाश्वमेधिकतीर्थमाहात्म्यवर्णनम्, रुद्रवेदीतीर्थोत्पत्तिविषये भृगुकृतशिवस्तोत्रवर्णनम्, भृगुक्षेत्रमाहात्म्यम्, नर्मदास्थितवृषतीर्थमाहात्म्यम्, गौतमेश्वरतीर्थधौतपापतीर्थैरण्डीतीर्थहिरण्यद्वीपतीर्थकनखलतीर्थेशतीर्थवाराहतीर्थसोमतीर्थद्वीपेश्वररुद्रकन्यादेवतीर्थशिखितीर्थभृगुतीर्थमाहात्म्यवर्णनम्. श्लो० ८२ ॥
२१—	१६	विहगेश्वरतीर्थनर्मदेश्वराश्वतीर्थपितामहतीर्थसावित्रीतीर्थमनोहरतीर्थमानसतीर्थक्रतुतीर्थत्रिदशज्योतिदशकन्यातीर्थस्वर्गबिन्दुतीर्थाप्सरेशनरकतीर्थभारभूततीर्थाटवीतीर्थशृंगतीर्थैरण्डीनर्मदासंगमतीर्थनर्मदोदधिसंगमवर्तिजमदग्नितीर्थविमलेश्वरकेशिनीतीर्थसागरेश्वरमाहात्म्यवर्णनम्. श्लो० ५२ ॥
२२—	१७	नर्मदामाहात्म्यवर्णने प्रमोहिन्यादिगंधर्वकन्यानामितिहासवर्णनम्, तत्र तासांगौरीसमाराधनायाच्छोदसरोवरं गत्वागौरीमभ्यर्च्य स्नानार्थमागतस्य मुनिपुत्रस्यवीक्षणमू, तंदृष्ट्वातासां कामावस्थावर्णनम्, तस्यमुनिपुत्रस्य स्वाश्रमगमनानंतरंतासांविक्लवावस्थावर्णनम्, द्वितीयदिवसे पुनस्तस्मिन्सरोवरे तेनमुनिसूनुनासह तासांसंगमेसंवादेच गंधर्वकन्याभिस्तदंगवेष्टनम्, तत्कृत्यक्रुद्धेन मुनिपुत्रेण गंधर्वकन्यानां पिशाचत्वशापदानम्, ताभिश्चतस्य पिशाचत्वशापदानम्, तासांतस्यच पिशाचरूपेणावस्थानम्. श्लो० १०८ ॥
२३—	१९	यदृच्छागतलोमशमुनिना सहपिशाचीगणसहितस्य पिशाचस्यतस्य द्विजपुत्रस्यसंवादः, लोमशेननर्मदास्नानेन तस्यतासांच पैशाच्यान्मोचनम्. श्लो० ३४॥
२४—	२०	अन्यतीर्थमाहात्म्यवर्णनम्, तत्रदक्षिणसिंधुचर्मण्वत्यर्बुदाचलपिंगातीर्थसरस्वतीसागरसंगमतीर्थवरदानतीर्थद्वारवतीपिंडारकसिंधुसागरसंगमशंकुकर्णेश्वरातिमितीर्थवसुधारासिंधूत्तमवसुतीर्थब्रह्मतुंगकुमारीतीर्थशक्रतीर्थरेणुकातीर्थपंचनदभीमास्थानगिरिकुंजविमलतीर्थमाहात्म्यवर्णनम्. श्लो० ३८ ॥

इतिस्वर्गखंडानुक्रमणिका संपूर्णा ॥ ३ ॥

अथ चतुर्थब्रह्मखंडस्थविषयानुक्रमणिका प्रारभ्यते ॥ ४ ॥

इति ब्रह्मखंडस्थविषयानुक्रमणिकासंपूर्णा ॥ ४ ॥

अथ पंचमपातालखंडस्थविषयानुक्रमणिका प्रारभ्यते ॥ ५ ॥

अ० प० विषयाः

अ० प० विषयाः

अ० प० विषयाः

अ० प० विषयाः

अ०	प०	विषयाः
		विधिः, चतुर्युगधर्माः, कलियुगे दानप्रशंसा, हरिकीर्तनपुराणश्रवणमाहात्म्यकथनम्, पुराणपठनश्रवणाधिकारिवर्णनम्, गौतमब्राह्मणवृत्तांतः. श्लो० ४९४ ॥
११५	१६५	पठनकर्तृणां लक्षणानि, पुराणश्रवणपुराणवाचनविधिः, पुराणसंख्यापूर्वकमहापुराणोपपुराणपरिगणनम्. श्लो० ९७ ॥
११६	१६७	जांबवदुक्तपुराकल्पीयरामायणकथावर्णनम्. श्लो० ३०५ ॥
११७	१७४	भरद्वाजाश्रमात्सुदेवगृहं गत्वा तत्र सभायां स्थित्वा गौतमगृहचरित्रजिज्ञासया रामेणप्रश्ने कृते सति शंभुब्राह्मणेन रामंप्रति गौतमगृहवृत्तांतकथनम्, तत्रन्यायार्जितधनेन देवपूजादिमाहात्म्यवर्णनम्, अत्र विषये मंकणकपुत्रस्याकथस्य वृत्तांतवर्णनम्, रामकृतकौसल्यामासिकश्राद्धविधिः, श्राद्धकाले कस्यचिदभ्यागतस्यागमनम्, तेनातिथिनारामसीतयोः सत्वपरीक्षणम्, अन्यायार्जितद्रव्येण देवपूजाकर्तुः किल्बिषप्राप्तिः, अत्रार्थे रूपकराक्षसस्य वृत्तांतवर्णनम्, उपहतद्रव्येण पूजानिषेधः, तत्र चेकितानिब्राह्मणवृत्तांतः, उपहतघंटाकारणवर्णनम्, तत्र मन्दस्यवृत्तांतवर्णनम्, पातालखंडश्रवणफलवर्णनम्, पुराणवाचकपूजाकथनम्. श्लो० २४२ ॥

इति पाद्मपुराणपातालखंडस्थविषयानुक्रमणिका संपूर्णा ।

अथ पाद्मपुराणोत्तरखण्डस्थविषयानुक्रमणिका.

अ०	प०	विषयाः
१	१	महेशनारदसंवादे धर्मबीजसमुच्चयवर्णनम्. श्लो० ७० ॥
२	२	नारदोमापतिसंवादे बदरीनारायणमाहात्म्येरुद्रप्रसादवर्णनम्. श्लो० १८ ॥
३	२	युधिष्ठिरनारदसंवादे जालंधरोत्पत्तिवर्णनम्, तत्र ब्रह्मण आगमनवर्णनम्. श्लो० ५२ ॥
४	३	जालंधरोपाख्याने वृंदाविवाहः, जालंधरस्याभिषेकवर्णनंच श्लो० ५२॥
५	४	क्षीरोदधेर्मथनकारणज्ञानायजालंधरेण शक्रंप्रतिदूतप्रेषणम्, दैत्यसैन्यानां देवसैन्यैः सह युद्धवर्णनम्. श्लो० ९३ ॥
६	६	विष्ण्वादीनां कालनेम्यादिभिः सह द्वंद्वयुद्धम्, इंद्रबलयोर्द्वंद्वयुद्धे इंद्रकृतमुद्गरप्रहारेण बलदैत्यस्यांगविशरणम्,तेनतदंगेभ्यो रत्नाद्युत्पत्तिः, इंद्रेणबलस्य वधकरणम्, तत्पन्याः प्रभावत्याः पत्याज्ञयानदीरूपप्राप्तिवर्णनम्. श्लो० ४१ ॥
७	७	जालंधरेणेंद्रपराभवकरणम्, विष्णुजालंधरयोर्युद्धम्, विष्णुकृतजालंधरसेनावधः, जालंधरेणद्रोणाचलानयनम्, जालंधरकृतबाणप्रहारेण विष्णोर्मूर्च्छाप्राप्तिः, लक्ष्मीप्रेरणया कृतनमस्कारस्य जालंधरस्य विष्णुनावरदानम्, जालंधरप्रार्थनया विष्णुना तद्गृहे वासकरणम्. श्लो० ८६ ॥
८	८	जालंधरस्य सकलदेवपराजयपूर्वकंसौराज्यप्रतिष्ठापनम्. श्लो० २६ ॥
९	२	सर्वदेवप्रार्थनयाशंकरेण सर्वदेवतेजोमयचक्रनिर्माणम्. श्लो० ३८ ॥
१०	९	नारदमुखाज्जालंधरेणपार्वतीसौंदर्यं निशम्य शंकरंप्रति राहुदूतप्रेषणम्, राहुणाशंभवे जालंधरसंदेशकथनम्, अत्रांतरेशिवजटाजूटात्कीर्तिमुखगणोत्पत्तिः, राहोः प्रत्यागमनम्. श्लो० ५३ ॥
११	१०	जालंधरस्य युद्धार्थयात्रावर्णनम्, नंदिप्रमुखैः शिवगणैर्जालंधरसैन्यपराभवकरणम्. श्लो० ६८ ॥
१२	१२	शुंभादीनां नंद्यादिभिः सह युद्धम्, तत्र नंद्यादीनां पराजयः, शंकरेण दैत्यपराभवकरणम्. श्लो० ६४ ॥

अ० प० विषयाः

इति पाद्मपुराणोत्तरखण्डस्थविषयानुक्रमणिका संपूर्णा ॥ ६ ॥

अथ पाद्मपुराणस्थक्रियायोगसारखण्डस्थविषयानुक्रमणिका ।

इति क्रियाखंडस्थविषयानुक्रमणिका संपूर्णा ॥ ७ ॥

इतिखानदेशीयरावेरग्रामनिवासिपरशुरामभट्टतनयगोविंदशास्त्रिविरचितापाद्मपुराणस्थविषयानुक्रमणिका संपूर्णा ।

इयमनुक्रमणिका मुम्बय्यां श्रीकृष्णदासात्मजेन खेमराजेन स्वकीये 'श्रीवेङ्कटेश्वर' यन्त्रालयेऽङ्कित्वा प्रकाशिता ।

संवत् १९५२ शके १८१७ सन् १८९५.

जाहिरात।


धन्यवादः ।

एतस्य पाद्ममहापुराणस्यादर्शपुस्तकानि भोरसंस्थानस्थपंतसचिवमहाराजानां, पंचावदेशीयलाहोरराजधानीनिवासिनां राजासाहिबदयालुपौत्र श्रीठाकुरमहान्चंद्राभिधेयानां, बडोदासंस्थानमहाराजानां श्रीमंतगायकवाडसरकारश्रीसयाजीरायमहाराजानां, बडोदानगरवासिबाबासाहेबपौराणिकानां, बेळगांवनगरवासिआबाजीरामचंद्रसांवत इत्येतेषां, पंजाबदेशीयनाभानगरनिवासिपंडितानां, सिद्धपुरपाटननिवासिनां यशवतंराव गोपाळराव देशमुखइत्येतेषां महाशयानां प्राचीनपुस्तकालयेभ्य उपलब्धानि । तानि सर्वाणि पुस्तकानि तैलंगदेशमुद्रितपुस्तकंच समानीय सर्वेषां पाठभेदान्विषयसंपत्तिंच यथावदभिनिवेश्यानेकशास्त्रिणां साहाय्येन संशोध्य परिष्कृतमेतत्पाद्ममहापुराणं स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा भूतलनिवासिसर्वविद्वज्जनकृते प्रकाशितम् । पूर्वोक्तमहाशयानां स्वस्वपुस्तकालयस्थपुस्तकदानाद्बहूनुपकाराञ्छिरसा धारयामि । एवमेवेतराणि प्राचीनानि पुराणपुस्तकानि मुद्रणार्थं दत्वा स्वकीयं भासुरं यशो लोकोपकारकं सर्वतः प्रसृतमनुमंस्यंत इत्यभ्यर्थये सविनयम् । यदि विदुषां कृपा स्यात्पुस्तकानां च यथोचितं साहाय्यं स्यात्तर्हि शनैः शनैः प्रचलता क्रमेणाष्टादशपुराणान्युपपुराणानि च मुद्रितानि प्रसिद्धानि च भविष्यन्तीति ।

उपकृतस्मतां कृपाभिलाषी–

खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना, खेतवाडी–मुंबई.

॥ अथ श्रीपाद्मपुराणांतर्गतपुरुषोत्तममासमाहात्म्यं प्रारभ्यते ॥



श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ ॥ श्रीगुरुभ्योनमः ॥ ॥ श्रीमल्लंबोदरेशाननंदनानंदवर्द्धनम् ॥ विघ्नवल्लीकुठारेशत्वांप्रप
द्येमहाशुभम् ॥ १ ॥ वेदसद्गुरुपादाब्जंयत्कृपालेशनंदिताः ॥ जायंतेसज्जनाःसद्यःप्रपंचार्णवपारगाः ॥ २ ॥ कदाचित्पर्यटंस्तीर्थयात्रामुद्दिश्यधार्मि
कः ॥ सूतःपौराणिकोव्यासशिष्योधर्मार्थकोविदः ॥ ३ ॥ बहुतीर्थाम्भसिस्नातःसमगान्नैमिषालयम् ॥ तत्रापश्यद्द्विजगणैर्वेष्टितंशौनकंप्रभुम् ॥ ४ ॥
मूर्तिमद्भिरिवादित्यैर्वेदवेदांगपारगैः ॥ दिगंबरैर्मुक्तकेशैरंबुवाताशनैरपि ॥ ५ ॥ निराहारैर्निष्कपटैस्तपसादग्धकिल्बिषैः ॥ आब्रह्मस्पृहणीयैःसच्छ्रद्धा
पूतांतरात्मभिः ॥ ६ ॥ आस्तिक्यैर्ब्रह्मसंदोहचिंतानिस्तीर्णहायनैः ॥ परिशंकितमार्तण्डैःशापानुग्रहकारकैः ॥ ७ ॥ बह्वृचैःसामगैर्दिव्यैर्यजुषांगणपा
ठकैः ॥ आथर्वणैरुग्रतेजैःसर्वलोकनमस्कृतैः ॥ ८ ॥ बह्वृचंभार्गवमुनिंशौनकंवृद्धसंमतम् ॥ शिष्यैरुपेतंश्रीमद्भिर्गीर्वाणैरिववासवम् ॥ ९ ॥ दृष्ट्वैवाशुन
नामैनंसूतोविनयवाञ्छुचिः ॥ प्रयतःप्रांजलिःप्रह्वःशिववाक्छुभलोचनः ॥ १० ॥ तमालोक्यमहातेजाब्राह्म्यालक्ष्म्याविराजितः ॥ सजातोतीवहृष्टात्मा
प्राणान्प्राप्ययथातनुः ॥ ११ ॥ हर्षगद्गदयावाचातमुवाचमुनीश्वरः ॥ एहिसूतमहाभागभाग्यवानसिसांप्रतम् ॥ १२ ॥ अत्यंतशुभशीलस्त्वंयन्मेदृ
ष्टोसिवैभवान् ॥ १३ ॥ चिरंजीवचिरंपाहिगृणतोनःशुभानन ॥ तिष्ठस्वोच्चासनेशुभ्रेमद्दत्तेधूतपापक ॥ १४ ॥ श्लाघनीयोसिपूज्योसिव्यासशिष्यशि
रोमणे ॥ कथयस्वकथामेकांपृच्छामित्वांहरिप्रियाम् ॥ १५ ॥ चिंतितांचिरकालंमेहृदयेपरिवर्तिनि ॥ नास्तित्वत्सदृशोभूमौसंदेहतिमिरापहः ॥१६॥
एवंपृष्टःशौनकेनसूतश्चातुर्यभूषणः ॥ प्रत्युवाचप्रसन्नात्माविनयानतकंधरम् ॥ १७ ॥ सूतउवाच ॥ शृणुविप्रेशवक्ष्यामियतोहमागतःप्रभो ॥ त्वदीय
दर्शनाह्लादपूरितःकरुणानिधे ॥ १८ ॥ आदावहंगतःस्वामिंस्तीर्थंपुष्करसंज्ञितम् ॥ स्नात्वाचम्यचसंतर्प्यसुरानृषिगणान्पितॄन् ॥ १९ ॥ ततःप्रयातोय
मुनामापगांपापनाशिनीम् ॥ तस्यानुवैगतस्तीर्थंपुष्कलंभोद्विजेश्वर ॥ २० ॥ सुरनद्यामनुस्नातस्ततःकाशीमुपागतः ॥ वेणायांकृष्णवेणायांगण्ड
क्यांपुलहाश्रमे ॥ २१ ॥ धेनुमत्यांतुरेवत्यांततःसरस्वतीतटे ॥ त्रिरात्रमुषितोब्रह्मंस्ततोगोदावरींगतः ॥ २२ ॥ सीतामलकनंदांवाह्यवटोदामथोनदी
म् ॥ कृतमालांचकावेरींनिर्विंध्यांताम्रपर्णिकाम् ॥ २३ ॥ तापींवैहायसींनंदांनर्मदांपापमोचनीम् ॥ पयोष्णींसुरतांशुभ्रामघःशोणानदद्वयम् ॥ २४ ॥
भद्रांदृषद्वतींविप्रतापसैरुपसेविताम् ॥ पापसंघान्नाशयित्वाततश्चर्मण्वतींनदीम् ॥ २५ ॥ ततःप्रयातःप्रयतःकल्याणींजगदंबिकाम् ॥ सर्वाभयकरीं
देवींसंसारभयनाशिनीम् ॥ २६ ॥ नमस्कृत्यजगद्धात्रींमहामायांसुरेश्वरीम् ॥ सिद्धक्षेत्रंसदारम्यंप्राप्तवान्मुनिसंस्तुतम् ॥ २७ ॥ एतेष्वन्येषुतीर्थे
षुव्रजन्नागतवान्विभो ॥ कुरुजांगलकेदेशंयत्रागाद्भगवान्प्रभुः ॥ २८ ॥ व्यासपुत्रोमहातेजाःशुकदेवःप्रतापवान् ॥ ब्रह्मभूतोमुनिवरःश्रीमा

न्विगतकल्मषः ॥ २९ ॥ श्रीकृष्णपदवीन्यस्तमनाभूतोपकारकः ॥ जन्ममृत्युनिवृत्त्यर्थंराजाक्षत्रशिरोमणिः ॥ ३० ॥ विरक्तस्यमहाबाहो
विष्णुरातस्यभूपतेः ॥ देहादिसकलंवस्तुमलभूतंतुयन्मते ॥ ३१ ॥ यदृच्छयागतस्तत्रतस्यानुग्रहकारणे ॥ श्रुत्वातमागतंदिव्यंमुनिभिः
परिवारितम् ॥ ३२ ॥ गतोहमपितत्रैवसंस्थितस्तदनुग्रहात् ॥ श्रुत्वाविष्णुकथास्तत्रभवसागरमोचिनीः ॥ ३३ ॥ चित्तंकृत्वामनोधीरऐहिकामु
ष्मिकांगतिम् ॥ निराकृत्यहरेःस्थानमंजसैवप्रपद्यते ॥ ३४ ॥ तत्रानेकाःकथाःश्रुत्वाब्रह्मरातप्रसादतः ॥ गतेपरीक्षितःस्थानमनावर्तनमुत्तम
॥ ३५ ॥ यत्रगत्वानशोचंतिस्पृहयंतिमनीषिणः ॥ नैतच्चित्रंगतिंज्ञात्वाहरिलीलाश्रुतेःकिल ॥ ३६ ॥ सकृद्यन्नामसन्मात्रंतावत्पातकसंततिम् ॥
दग्धंशक्तोभवेत्कर्त्तुंजन्मनापिनशक्यते ॥ ३७ ॥ तत्कथंमुच्यतेनायंपरीक्षित्साधुसंमतः ॥ इतिसंचिंतयन्विप्राःसन्निधिंभवतामहम् ॥ ३८ ॥
प्राप्तवान्सत्रिणोज्ञात्वाभवतःकलितोभवात् ॥ तदनुज्ञामथेच्छामियत्कर्तास्म्यद्यानिश्चितम् ॥ ३९ ॥ धन्योस्म्यनुगृहीतोस्मियन्मांस्मरथसत्तमाः ॥
स्वल्पभाग्यतरंमूढंसर्वथाज्ञानजल्पकम् ॥ ४० ॥ जातंचप्रतिलोमेनमूर्खंपंडितमानिनम् ॥ एवंचोक्तास्ततोधीमान्वेदवेदांगपारगम् ॥ ४१ ॥
शौनकंप्रत्युवाचेदंप्रहसञ्छ्लक्ष्णयागिरा ॥ साधुपृष्टंमहाभागनिष्पापोस्तिभवान्किल ॥ ४२ ॥ त्वत्समोनास्तिलोकेषुवेदव्यासगृहालयम् ॥
प्रश्नमेनंवदस्वाद्ययन्मेहृदिचिरंस्थितम् ॥ ४३ ॥ नकश्चित्त्वदृतेविद्वन्संदेहामयभेषजम् ॥ संतिमध्वादयोमासाःसेश्वरास्तेश्रुतामया ॥ ४४ ॥
अधिमासस्यकःस्वामीपूज्यमानश्चकस्तदा ॥ तस्मिन्किंचित्प्रकर्त्तव्यंव्रतदानानिभोजनम् ॥ ४५ ॥ जपदानोपवासादिसाधनंकिंतुभण्यताम् ॥
तुष्येत्कृतेनकोदेवःकिंफलंवाप्रयच्छति ॥ ४६ ॥ अन्यच्चब्रूहिनःसूतव्यासशिष्योस्तिवैभवान् ॥ नरायेभुविजायंतेपरभाग्यानुवर्त्तिनः ॥ ४७ ॥
दारिद्र्यपीडितानित्यंरोगिणःपुत्रकांक्षिणः ॥ जडामूकादांभिकाश्चहीनविद्याःकुचेष्टिनः ॥ ४८ ॥ नास्तिकालंपटारौद्राजर्जराःपरसेविनः ॥ नष्टाशाभ
ग्नसंकल्पाःक्षीणकृत्याःकुरूपिणः ॥ ४९ ॥ निःश्वासाश्चोपमायस्ताःससतंदुःखभागिनः ॥ इष्टपुत्रकलत्रादिपितृमातृवियोगिनः ॥ ५० ॥ शोकदुःखाति
शुष्कांगाःस्वेष्टवस्तुविवर्जिताः ॥ पुनर्नैवंविधास्तेस्युर्यत्कृतेनश्रुतेनच ॥ ५१ ॥ नारीणामपिभोसूतदृष्ट्वादुःखान्यनेकशः ॥ वैधव्यंवांध्यदौर्भाग्यंहीनांग
त्वाद्गुराधयः ॥ ५२ ॥ दुःखपीडितसर्वांगोवीक्ष्यदुःखान्वितःप्रभो ॥ तद्ब्रूहित्वंममह्याशुयेनप्रीतोऽभवंपुनः ॥ ५३ ॥ सर्वज्ञःसर्वशास्त्राणांनिधानंत्व
मसिप्रिय ॥ सूतपुत्रस्त्विमांवाचंश्रुत्वासंहृष्टमानसः ॥ ५४ ॥ प्रत्युवाचहृषीकेशंस्मरञ्छंखगदाधरम् ॥ ५५ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येऋ
षिसूतसंवादोनामप्रथमोऽध्यायः ॥ १ ॥ ॥ सूतउवाच ॥ शृणुएकाग्रचित्तस्त्वंद्विजराजशिरोमणे ॥ श्रीकृष्णंपांडुतनयोज्येष्ठःपप्रच्छधर्म

वित् ॥ १ ॥ धार्मिकःसत्यसंधोयःकुंतीहृदयतोषकः ॥ यदाद्यूतजितःपार्थःक्लेशितोधार्त्तराष्ट्रजैः ॥ २ ॥ कोपेनवेणींसंगृह्यकृष्णादुःशासनेनवै ॥
आकृष्टातत्रवासांसिश्रीकृष्णेनैवरक्षिता ॥ ३ ॥ युधिष्ठिरःस्वदेशंचत्यक्त्वाकाम्यंवनंगतः ॥ ज्ञातवृत्तांतआगम्यवासुदेवःप्रतापवान् ॥ ४ ॥ यादवैरावृतः
श्रीमान्सात्यकिप्रमुखैर्वृतः ॥ दृष्ट्वैतान्नुरुतापान्वैरौरवाजिनवाससः ॥ ५ ॥ जटिलान्धूलिरूक्षांश्चपांचालीमपितादृशीम् ॥ भक्तदुःखेनातिदुः
खीसर्वदाभक्तवत्सलः ॥ ६ ॥ दग्धुकामःसत्रैलोक्यान्धार्त्तराष्ट्रान्सतांपतिः ॥ चक्रेकोपंसविश्वात्माभृकुटीकुटिलेक्षणः ॥ ७ ॥ युगांताग्निसमाकारः
कोटिसूर्यकलेवरः ॥ ददृशेरुक्मिणीनाथोदिधक्षन्निवसागरम् ॥ ८ ॥ सीतावियोगंसतदासाक्षाद्दशरथात्मजः ॥ तमालक्ष्यतदावीरोह्यर्जुनोजातवे
पथुः ॥ ९ ॥ प्रणम्यस्तुतवान्विष्णुंभवायजगतांविभुम् ॥ बिडौजानुजमत्युग्रंकालाग्निमिवदीपितम् ॥ १० ॥ अर्जुनउवाच ॥ देवदेवमहादेव
क्षमस्वजगदीश्वर ॥ नायंतेकोपसमयःसंयच्छानंदयप्रभो ॥ ११ ॥ भूतभव्यभवन्नाथभक्तेशोपात्तविग्रह ॥ यच्चक्षुःपतनेनैवजगतःप्रलयोभवेत्
॥ १२ ॥ कृपांकुरुजगन्नाथसाधूनांत्वंपरायणः ॥ कंसकेशिकचाणूरमुष्टिकारिष्टमर्दनः ॥ १३ ॥ व्योमवत्साहिकालेयबकयक्षनियामक ॥ त्राहित्राहि
महाराजजगदेतत्त्वदीयकम् ॥१४॥ त्वत्कोपदग्धंकस्त्राताकृपांकुरुविदांवर॥ इतिस्तुत्वाननामाशुफाल्गुनःपरवीरहा ॥१५॥ वीतरोषोहरिर्जातःशुशुभे
सात्वतांपतिः ॥ सर्वैःशुशुभिरेतत्रतारकाइवनिर्मलाः ॥ १६ ॥ ततःकुशस्थलीनाथंजगतामादिकारणम् ॥ तारणंभक्तसंघानांवारणंभवसंततेः ॥ १७ ॥
गोकुलानंददंदेवेशंलीलागात्रधरंहरिम् ॥ नत्वापृच्छत्सुमनसात्वंचपृच्छसिमांतुयत् ॥ १८ ॥ श्रुत्वैतद्भगवान्कृष्णःविष्णुःकृष्णाहिमर्दनः ॥ दध्यौमुहूर्त्त
मात्रंतुसिद्धसेवितपत्कजः ॥ १९ ॥ ध्यात्वाऽऽश्वास्यसुहृद्वर्गंकृष्णांशशिनिभाननाम् ॥ वक्तुमारभतप्रश्नंयत्कृतंधर्मसूनुना ॥ २० ॥ श्रीकृष्णउवाच ॥
शृणुराजन्महाभागसर्वधर्मभृतांवर ॥ प्रश्नोयंदुर्धरःसाधोमदन्येनकुरूद्वह ॥ २१ ॥ अनुक्रमेणतेवत्सप्रश्नानामुत्तरंपृथक् ॥ मयापिकथितंनास्तिकस्य
चित्पुरतःप्रभो ॥ २२ ॥ मध्वादयोमासवरालवपक्षाश्चनाडिकाः ॥ यामार्धयामसहितोमुहूर्तस्त्वयनेउभे ॥२३॥ हायनंयुगसंख्यानंचतुर्युगमनुक्रमात् ॥
नद्योर्णवाह्रदाःकूपावापीपल्वलनिर्झराः ॥ २४ ॥ औषधीद्रुमवल्ल्यश्चसर्वेचैवद्रुमाश्रये ॥ वनस्पतिपुरग्रामगिरयःपत्तनानिच ॥ २५ ॥ एतेसर्वेमूर्तिमंतः
पूज्यंतेस्वामिनोगुणैः ॥ नह्येषांकश्चिदप्यस्तिअपूज्यःप्रभुवर्जितः ॥ २६ ॥ स्वेस्वेधिकारेसततमर्चंतेसफलप्रदाः ॥ स्वस्वामियोगमाहात्म्याद्यथा
योगेनपांडव ॥ २७ ॥ अधिमासःसमुत्पन्नःकदाचिन्मनुजर्षभः ॥ तमूचुःसकलालोकाअसहायंजुगुप्सितम् ॥ २८ ॥ अनर्होमलमासोयंरविसंक्रमव
र्जितः ॥ अस्पर्शोऽकर्मकस्तुच्छःसर्वकर्मबहिष्कृतः ॥ २९ ॥ श्रुत्वैतद्वचनंलोकान्निरुद्योगोहतप्रभः ॥ दुःखितोऽतीवसंत्रस्तोमृत्युमंगीचकारसः ॥३०॥

हृदयेचिंतयित्वातुमामसौशरणंगतः ॥ चेतसाचिंतयंस्तत्रतुष्टावजगदीश्वरम् ॥ ३१ ॥ गत्वावैकुंठभवनमास्थितःपरमासने ॥ प्रांजलिःप्रणतोभूत्वासुं
चन्नश्रूणिनेत्रयोः ॥ ३२॥ अधिमासउवाच ॥ देवाधिदेवेशजगन्निवासजगद्गुरोभूतपतेनमस्ते ॥ अनाथनाथाखिलविश्वपालगोपालनारायणवासुदेव॥३३॥
यथाविभोतेनिमिराजपुत्रीपौलस्त्यदुष्टेनछलाद्गृहीता ॥ विमोचितागौतमधर्मपत्नीतथैवमांपाहिरघुप्रवीर ॥ ३४ ॥ यथादेवकीकंसदुष्टाद्विमुक्ताचिरग्रा
हगीर्णोगजेंद्रोपिमुक्तः ॥ जरासंधराजन्यनीतामहीपास्तथापाहिमांरुक्मिणीनाथविष्णो ॥३५ ॥ यथाजामिलःकोऽपिलुब्धोबलायांयथागोपिकायाज्ञसेनी
गरिष्ठाः ॥ दरिद्रीकुचैलोद्विजेंद्रोर्चितस्तेविभोजानकीजीवनाधीशपाहि ॥ ३६ ॥ त्वदीयंपदद्वंद्वमासाद्यतत्रऋषेरंगनालोकमाप्तातदैव ॥ कृपानीरधिंशे
विधिंसेवकानांकथंजानकीजीवनंनोभजामः ॥ ३७ ॥ तवत्विच्छयाशीततामेतिवह्निश्चलत्वंसुभेजेलघुत्वंनदीशः ॥ जडत्वंसुरेज्योविभोत्वंदिनेशोभवे
द्रुक्मिणीवल्लभःकिन्नपाहि ॥ ३८ ॥ श्रीकृष्णउवाच ॥ स्तुत्वैवंविरराभोयंयदामासविभूषणः ॥ धरणौगत्वाचशोकेनतत्क्षणात्साश्रुलोचनः ॥ ३९ ॥
तमब्रुवंविनम्रांगमधिमासंपुरःस्थितम् ॥ वत्सवत्सकिमित्येवंदुःखमग्नोसिसांप्रतम् ॥ ४० ॥ यत्किंचिद्धृद्गतंशल्यमुद्धरामिवदाशुमे ॥ नमत्पादाब्जश
रणंप्राप्यशोचितुमर्हति ॥ ४१ ॥ पतितोपिमहाबाहोकिंपुनस्त्वत्समोजनः ॥ मल्लोकंविद्धिनिर्दोषंनामदुःखमजंवरम् ॥ ४२ ॥ त्वामत्रदुःखितंदृष्ट्वावि
स्मितामेपुरःसराः ॥ मर्त्तुकामोसियेनत्वंतद्ब्रूहिशरणंगतः ॥ ४३ ॥ अधिमासउवाच ॥ विभोवेत्तिभवान्सर्वंनाज्ञातंकिंचिदस्तिते ॥ चराचरगुरुःस्वा
मीसाक्षीसर्वस्यचेतसः ॥ ४४ ॥ कूटस्थःसर्वसंस्थोसिनत्वयारहितःक्वचित् ॥ किंमेनवेत्सिहृद्दुःखमल्पभाग्यतरस्त्वहम् ॥ ४५ ॥ तथापिशृणुमेभूम
न्दुःखकारणमद्भुतम् ॥ सामान्यधर्मिणःसर्वेसुखंजीवतिजंतवः॥४६॥तत्रहीनत्वमापन्नोमृत्युमिच्छामिसत्पते ॥ क्षणालवामुहूर्त्तानिपक्षामासादिवानिशम्
॥४७॥ नामाधिकारप्रभुभिर्मोदंतेनिर्जरायथा ॥ नमेनामनमेस्वामीनमेकिंचिद्व्यपाश्रयः ॥४८॥ निष्कर्मचविहीनस्यसर्वैसंभूयदुर्जनैः ॥ मलमासोनिषि
द्धोयंनित्यंव्याख्यातिमांसदा॥४९॥तस्माद्धिमर्त्तुमिच्छामिनाहंजीवितुमुत्सहे ॥ कुजीविताद्वरोमृत्युर्नित्यदग्धःकथंस्वपेत्॥५०॥तत्कुरुष्वमहाराजयत्ते
मनसिवर्त्तते ॥ नजीविष्येनजीविष्येपुनःपुनरुवाचह॥५१॥एवंविज्ञाप्तिमुक्त्वावैसोधिमासस्तदाविभो॥विसंज्ञोनिपपाताशुपादमूलमुपागतः॥५२॥विस्मि
ताःपार्षदाःसर्वेतद्दर्शनविलोकनात्॥ममापिकरुणाजातापरिपूर्णानराधिप॥५३॥शृणुराजंस्ततोवृत्तंयत्तद्वक्ष्यामितत्त्वतः ॥ कटाक्षेणसमादिष्टःसुपर्णस्तम
वीजयत्॥५४॥पक्षवातेनतरसावीजयामाससादरम्॥उत्थितःपुनरेवाहनैतन्मेरोचतेविभो॥ ५५॥पाहिमांकरुणानाथयत्तेशरणमागतः॥ गोपीहृदयकामा
ग्निशमनोजनवल्लभः॥५६॥ तमुवाचमहाभागोवेपमानंमदंतिकम्॥५७॥इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येऽधिकमासविज्ञप्तिर्नामद्वितीयोऽध्यायः ॥२॥

॥ श्रीकृष्णउवाच ॥ साधुसाधुसुरश्रेष्ठयन्मामनुसृतोभवान् ॥ यत्तेदाझितदप्राप्यंसुरैर्ऋषिगणैरपि ॥ १ ॥ नमासुपेतःकुत्रापिशोकवान्दृश्यतेनरः ॥ तस्माद्भवतुसुश्वस्तःसर्वाधिकतरोभवान् ॥ २ ॥ कीर्त्यालक्ष्म्यानुभावेनबलेनचरितेनच ॥ शौर्यवीर्यगुणज्ञानप्रज्ञाधैर्यपराक्रमैः ॥ ३ ॥ यन्मदात्मंज गत्सर्वंवीतशोकोभयंत्यज ॥ ततस्तुममसादृश्यमश्रीयाःसाधिपोभव ॥ ४ ॥ वैराग्यैश्वर्यधर्मार्थप्रतापानुग्रहाश्रमैः ॥ श्रीभाग्यसौख्यलालित्यगुणैश्वर्य तपोव्वरैः ॥५ ॥ सखेसंतुष्टिकरुणाकेलिदाक्षिण्यसौष्ठवैः ॥ विद्याविनयनैपुण्यधर्मकर्मसदुक्तिभिः ॥ ६ ॥ एतैरन्यैर्गुणैःशुद्धैरुत्तमःपुरुषेष्वहम् ॥ तस्मा दभिज्ञासततंविदुषांपुरुषोत्तमम् ॥ ७ ॥ त्वमप्युत्तमतांयाहियतोहंभवतःप्रभुः ॥ मनसैवहितेनामविख्यातंपुरुषोत्तमम् ॥ ८ ॥ नाममात्रेणसर्वेषामघकं दनिकृंतनः॥किंपुनर्दत्तनामानिसत्कृपानिरतात्मनाम् ॥ ९ ॥ यथाहंनैर्जरेचक्रेमुख्यःसर्वोत्तमोत्तमः ॥ विधुर्याकिल्बिषाटोपमुद्धरामिभवार्णवात् ॥१०॥ तथात्वमपिभक्तानांदुःखदारिद्र्यखंडनः ॥ भविष्यसिजगत्पूज्यःस्वर्धुनीसरितांयथा ॥११॥ सर्वेमासकृताःकाम्यानमेत्वय्यकृतास्तथा ॥ कर्मदासास्त्वमे सर्वेनिष्कर्मफलदोभवान् ॥ १२ ॥ अध्यक्षादिष्टदातारोयेयेमासाधिपाःस्मृताः॥त्वदीयोस्म्यहमध्यक्षस्त्वयिसत्कर्मकारिणाम् ॥ १३ ॥ कर्मभिर्वैविमु क्तानांमोक्षदोहंनसंशयः ॥ अकामोवासकामोवायस्त्वय्याचरणेशुभम्॥१४॥आनंदंब्रह्मसदनंयश्चभोगसमुच्चयः ॥ तत्सर्वंदोहमुक्तस्तुसत्यंसत्यंवदाम्यह म् ॥ १५ ॥ यद्गत्वाननिवर्ततेभोगांतेतत्प्रयास्यति ॥ यजंतेवैमहाभागाऋषयोब्रह्मचारिणः ॥ १६ ॥ त्रैलोक्यदुःखभोक्तारोदृश्यंतेतेजनाः सदा ॥ तत्रकारणमत्युग्रंनतेजानंतिकेचन ॥ १७ ॥ शृणुतत्तेप्रवक्ष्यामिजायंतेयेत्वकर्मिणः ॥ सकामकर्मणःसर्वेमासिमासिभवंतिते ॥ १८ ॥ प्रवयःकामनिपुणानतुकैवल्यदायिनः ॥ कारणेनसमंकार्यंसर्वैर्देतन्निगद्यते ॥ १९ ॥ अगाधध्येयसंबंधोयथानानाव्यवस्थितः ॥ यादृशी कर्मणोवस्थाश्रद्धातोदेशकालतः ॥ २० ॥ सर्वोपकारणेयत्रकालोहिबलवत्तरः ॥ यादृशंकालमासाद्यकुरुतेकर्ममानवः ॥ २१ ॥ फलंतुतादृशं लब्ध्वाभूयएवप्रतप्यते ॥ अतःकालस्यमाहात्म्यंनकेनाप्यवगम्यते ॥ २२ ॥ एकमुष्टिगृहीतानांबीजानांरोपणस्तथा ॥ फलान्यसदृशान्येवजायं तेकालयोगतः ॥ २३ ॥ एकवंशसमुद्भूतैःसहकारैर्नसाम्यता ॥ लभ्यतेकालयोगेनपश्यत्वंपुरुषोत्तम ॥ २४ ॥ मातुर्गर्भाशयेलग्नाःपितृवीर्यमुपा श्रिताः ॥ एककालाःकुतस्तेपिनकालेनसमानता ॥ २५ ॥ तस्मात्काम्येषुमासेषुसकामाविहितंनरैः ॥ यत्तत्प्रभुसमादिष्टंयथोक्तंफलदंभवेत् ॥ २६ ॥ किंचिद्भोगानिहालभ्यपश्चाल्लोकांतरंगताः ॥ तत्तद्भोगांतमासाद्यपतंतिक्षीणकर्मिणः ॥ २७ ॥ निर्वृत्यकर्मसर्वेपिक्लिश्यंतेत्वातिसंकटैः ॥ त्वयिसद्धर्ममिच्छंतःसूरयोगुणभूषणाः ॥ २८ ॥ मामाश्रित्यचधैर्येणह्यस्मिन्कालेनिरामये ॥ कालस्यास्यप्रभुर्नित्यमहमस्मिन्नचेतरः ॥ २९ ॥

तस्मात्कृत्यफलस्यास्मिन्संख्यानंनैवलभ्यते ॥ निष्कामंचसकामंचकर्तास्मिन्संचितंजनैः ॥ ३० ॥ भक्तिमुक्तिप्रदंनित्यंमय्यधीशेऽमलात्मभिः ॥
अस्मिन्कृतंनरैःकर्मबाल्यादावपिसर्वथा ॥ ३१ ॥ यथाभूमिपतिर्भागंस्वीयंषष्ठंनमुंचति ॥ मद्दत्तकर्मणामंतोनभवेत्कर्हिचित्फुटम् ॥ ३२ ॥ अतोनंत
सुखावाप्तिरंतेमोक्षफलंलभेत् ॥ विधूयसर्वपापानिनिर्मलोजायतेजनः॥३३॥त्वयियेव्रतिनोदांतादानस्नानजपेरताः ॥ सर्वेसत्कृत्यरहितादेवतीर्थगुरुद्विषः
॥ ३४ ॥ जायंतेदुर्मुखादुष्टाःपरभाग्योपजीविनः ॥ नकदाचित्सुखंतेषांस्वप्नेपिशशशृंगवत् ॥ ३५ ॥ तिरस्कृत्यभवंतेयेमलमासेतिदांभिकाः ॥
नाचरिष्यंतिसद्धर्मंसदानियतवासिनः ॥ ३६ ॥ अल्पभाग्यास्वल्पविद्याजाताश्चनरकेष्विह ॥ पुरुषोत्तममासाद्यवर्षेवर्षेतृतीयके ॥ ३७॥ अविशेषकृतो
जीवाःकुंभीपाकेपतंतिते ॥ शोचंतिसततंजीवाभूमौदुष्कृतकारिणः ॥ ३८ ॥ पुत्रमित्रकलत्रार्तशोकसंविग्नमानसाः ॥ विलपंतिपतंत्येतेदुःखदावानले
चिरम् ॥ ३९ ॥ सदाराणांसरूपाणांगुणिनांदीर्घजीविनाम् ॥ चतुराणांसुविद्यानामाज्ञासंपादिनांतथा ॥ ४० ॥ सुवृत्तिहृतचित्तानांसाधूनांधैर्यशा
लिनाम् ॥ सुमुखानांवदान्यानांपुत्रिणांशीलवृत्तिनाम् ॥ ४१ ॥ श्यामाचश्यामवर्णाचश्यामाषोडशवार्षिकी ॥ अप्रसूताभवेच्छ्यामाश्यामामधुरभा
षिणी ॥ ४२ ॥ तेकथंसुखमेधंतेयेषामज्ञानतोगतः ॥ श्रीपुरुषोत्तमोमासोवैष्णवःपुरुषोत्तमः ॥ ४३ ॥ श्यामागुणवतीदिव्यासर्वालंकारभूषिता ॥ चतु
राशीलसंपन्नाचित्तेनारुंधतीसमा ॥ ४४ ॥ सुभगादर्शनीयांगीकुरंगीनयनांचला ॥ करिकुंभस्तनीरम्याशुभाताराधिपानना ॥ ४५ ॥ पदविन्यासचा
तुर्यंदृष्ट्वालज्जतिचाप्सराः ॥ स्वांगरागेणरुचिरावल्लीवकनकोत्कृता ॥ ४६ ॥ स्वरनिर्जितवित्तेशतरुणीपतिदेवता ॥ आज्ञाकारीसदापत्युश्छंदेनाचरती
शुभम् ॥ ४७ ॥ ईदृशीसुखदारामाकथंतत्सद्मचारिणी ॥ यस्याज्ञातोगतोमासोवैष्णवःपुरुषोत्तमः ॥ ४८ ॥ भ्रातरःपीडिताःशूरानवयौवनशालिनः ॥
प्रभिन्नाइवमातंगाःपराक्रमहतारयः ॥ ४९ ॥ ईदृशींकथमीप्संतेनकृतंपुरुषोत्तमे ॥ सुकृतंकिंचिदप्येवंनदत्तंदानमर्थिने ॥ ५० ॥ सुरूपःसुमुखः
शूरःसत्यवादहितेरतः ॥ दृढेंद्रियबलोपेतोहरिभक्तिपरायणः ॥ ५१ ॥ चातुर्यगुणसंपन्नःसुलक्षणसमन्वितः ॥ अंगदोधार्मिकोविद्वान्सात्विकःसततं
घृणी ॥ ५२ ॥ सर्वांगशोभनोतीवजातमात्रोथभाग्यवान् ॥ यत्रयत्रप्रयात्यग्रेधनराशिस्ततस्ततः ॥ ५३ ॥ लोभोऽधैर्यप्रमादश्चक्रोधेनाक्रमतेमनः ॥
ईदृशोजायतेजंतुःकथंयेननचार्चितः ॥ ५४ ॥ देवकीनंदनोदेवःसंप्राप्तेपुरुषोत्तमे ॥ अथवाजगदानंददायीशीतांशुभूषणः ॥ ५५ ॥ दिनेशोवागणा
धीशश्चंडिकाभक्तवत्सला ॥ महामायामहालक्ष्मीर्बंधमोक्षविधायिनी ॥ ५६ ॥ तेत्वांसंपूजयिष्यंतिजनाःसर्वेममाज्ञया ॥ त्वदीयमेतन्माहात्म्यं
नज्ञातंकेनाचिद्भुवि ॥ ५७ ॥ ज्ञानदृष्ट्याऋषिगणाज्ञास्यंतिममसद्व्रतम् ॥ ततस्त्वामर्चयिष्यंतिमच्छंदपरिपालकाः ॥ ५८ ॥ सर्वेषामपिमासानां

त्वमप्युग्रोभविष्यसि ॥ तथोत्तमांगमासीनःकिरीटइवराजसे ॥ ५९ ॥ इत्यादिश्यततोमासमहमंतर्हितोभवम् ॥ इतितेसर्वमाख्यातंयत्पृष्टोह
मिहत्वया ॥ ६० ॥ जननीयौवनवनच्छेत्तारोयेनराभुवि ॥ जायंतेसुखलेशाशातैलाभ्यंगकलेवराः ॥ ६१ ॥ प्रेताइवनिरानंदाविचरंतिमही
तले ॥ स्त्रीपुत्रधनधान्यादिहीनदीनमनःक्रियाः ॥ ६२ ॥ भवानपिमहाराजसदारानुजसेवितः ॥ नजानासिपृथिव्यांवैमासेशंपुरुषोत्तमम् ॥ ६३ ॥
नत्वयापिविशेषेणसेवितःपुरुषोत्तमः ॥ अतःपरंनरेंद्रेशमासोवैचागमिष्यति ॥ ६४ ॥ विष्णुप्रियोमहामासोभवतांकाननौकसाम् ॥ प्रमादतो
गतामासाःपंचैतेभवतामिह ॥ ६५ ॥ श्रीमद्भिस्तेप्यवज्ञाताभयद्वेषसमन्विते ॥ वैकर्तनांधकाःपुत्रःस्वर्धुनीसुतगौतमः ॥ ६६ ॥ द्रौणिद्रो
णसौवलेभ्योभयसंत्रस्तचेतसाम् ॥ वनवाससुखध्वंसस्वजनायोगदुःखितम् ॥ ६७ ॥ वनेवासंप्रसादाद्यांविद्याराधनतत्परे ॥ धनंजयेगतेस्वर्गे
इतोत्रासिससुव्रते ॥ ६८ ॥ तद्वियोगपरिक्लिष्टैर्नज्ञातःपुरुषोत्तमः ॥ साधनंजायतेराजन्भविष्यस्यप्रभावतः ॥ ६९ ॥ किमत्रभवतांकृत्यं
यद्भविष्येनवर्त्तते ॥ सुखंदुःखंभयंक्षेमंभविष्याद्प्रतेजनः ॥ ७० ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येभगवतःपुरुषोत्तमवरप्रदानंनामतृती
योऽध्यायः ॥ ३ ॥ श्रीकृष्णउवाच ॥ पांचालीयामहाभागापूर्वजन्मनिसुंदरी ॥ कस्यचिद्द्विजमुख्यस्यपुत्रीजातासुमध्यमा ॥ १ ॥ कालेनगच्छ
तातातसंजातादशवार्षिकी ॥ रूपलावण्यललितानयनापांगशालिनी ॥ २ ॥ चातुर्यगुणसंपन्नापितुरेकैवपुत्रिका ॥ वल्लभातीवतेनेयंपाठितागुणसुं
दरी ॥ ३ ॥ ललितापुत्रवन्नित्यंनकदाचित्प्रलंभिता ॥ साहित्यशास्त्रकुशलानीतावपिविशारदा ॥ ४ ॥ अतीवतेनचतुरारमान्याचयथाभुवि ॥ शुभा
शुभगुणज्ञानसौष्ठवेनविशारदा ॥ ५ ॥ नित्यंसुखवतीराजन्पुत्रपौत्रकृतस्पृहा ॥ चिंतयंतीतदाबालाह्येवंममकथंभवेत् ॥ ६ ॥ गुणभाग्यनिधिर्भर्तासु
खदामेसुताःकथम् ॥ एवंमनोरथस्यांतंनगतासामनस्विनी ॥ ७ ॥ किंवाप्रीतिसमायुक्तापूजयामिसुरेश्वरम् ॥ किंवामुनिमुपातिष्ठेकिंवातीर्थमुपाश्रये
॥ ८ ॥ सख्योमेसुतसौंदर्यालोकनाप्तमनोरथाः ॥ ममभाग्यप्रसंगेनदृश्यतेममनैवतत् ॥ ९ ॥ प्रमादीजनकोमेपितेनाहंदुःखिताबहु ॥ अध्यक्षाहंसखी
वृंदेतेनमानवतीदृढम् ॥ १० ॥ नाहंचैवसुखाभिज्ञासुखिनोममजामयः ॥ अल्पभाग्यवतीचाहंनकापिपरलोकगा ॥ ११ ॥ एवंचिंतयतीबालामनोरथ
महोदधौ ॥ निर्ममज्जातिदुःखेनशोकसंविग्नमानसा ॥ १२ ॥ मेधावीऋषिराजोसौविचचालमहीतलम् ॥ पुत्रीदाननिमित्तार्थंविचिन्वन्सदृशंवरम्
॥ १३ ॥ नाप्तवान्द्विजमुख्येशंसनिर्गतमनोरथः ॥ सुतास्वकीयभाग्येननप्राप्तासदृशंवरम् ॥ १४ ॥ अवापदैवयोगेनज्वरव्याधिंसुदारुणम् ॥
स्फुटत्सर्वांगसंभिन्नहृदयोगतचेतनः ॥ १५ ॥ कन्यादानोक्तसंकल्पभग्नपद्मवनालयः ॥ बद्धामयेनयुक्तोसौस्वगृहागमलालसः ॥ १६ ॥ सचलन्नपत

न्मूर्च्छामाप्नुवन्नृषिणांवरः ॥ मदिरामदमत्तांगोगजराजइवागमत् ॥ १७॥ आगच्छन्नेवभवनंसपपातधरातले॥यावत्सुतासमादातुंपितरंद्रवतिक्षणात् ॥ १८॥
तावत्परासुःसंजातोभूसुरस्तामनुस्मरन् ॥ भाविनार्थवलेनैवनप्राप्तश्रमनोरथः ॥ १९ ॥ गोविंदविश्वेशजगन्निवासदामोदराधारचराचराणाम् ॥ श्रीस
त्यभामालयचक्रपाणेमांपाहिदेवेशजगन्निवास ॥ २० ॥ इतिब्रुवन्नसून्विप्रःसंपश्यन्नयनाग्रतः ॥ तत्याजजगदानंदपादावापगदाग्रजम् ॥ २१ ॥ सानि
रीक्ष्यपितुःपातंहाहाकृत्वाप्रधाविता ॥ अंकेकृत्वापितुर्देहंविललापातिदुःखिता ॥ २२ ॥ कुररीवचिरंकालंविलप्यभृशपीडिता ॥ उवाचपितरंवा
लाजीवमानमिवात्मनः ॥ २३ ॥ हाहापितःकृपापूरपूरितप्रणयालय ॥ कस्यांकेमांनिधायाद्यगतोसित्वंमहामते ॥ २४ ॥ पित्राविहीनामात्राचबांधवैः
श्वशुरेणच ॥ भर्त्राश्वश्वाकुमार्यस्मिगतिःकामेभविष्यति ॥ २५ ॥ कन्याप्रदानसमयेकृतत्रासश्रमत्कृते ॥ आनंदसमयेगंतुंनार्होसित्वंयमालये ॥२६॥
कथंतिष्ठाम्यहंशून्येनिगमध्वनिवर्जिते ॥ आश्रमेतेद्विजश्रेष्ठकानुमेजीवितेस्पृहा ॥ २७ ॥ असंपाद्यैववैवाह्यंविधिंदुहितृवत्सल ॥ नयातुमत्पिताधीरोलो
कांतरमितोमम ॥ २८ ॥ इत्युक्त्वाश्रुमुखीश्यामाचुचुंबवदनंपितुः ॥ मुक्तकंठारुरोदार्त्तासुंदरीबहुलव्यथा ॥ २९ ॥ श्रुत्वातन्निनदंविप्रास्तपोवननिवा
सिनः ॥ किमेतन्महदाश्चर्यंश्रूयतेदारुणस्वनः ॥ ३० ॥ मेधाऋषेःसुताशब्दःश्रूयतेकरुणाकृतः ॥ इतितेसंभ्रमोपेताःसमापेतुःसहस्रशः ॥ ३१ ॥ शोक
संतप्तमनसोहाहाकारपराद्विजाः ॥ हंसाइवनिदाघार्त्ताबहुधापरिपीडिताः ॥ ३२ ॥ ददृशुर्ऋषिराजंतंसुतांकस्थंकलेवरम् ॥ समाश्वास्यततःकन्यांका
ष्ठानादायतत्तनुम् ॥ ३३ ॥ दग्ध्वाविभावसौसर्वेगताःस्वेस्वेनिवेशने ॥ बालातस्मिन्निवसतीआपद्गतमनोरथा ॥ ३४ ॥ चिंतयानातुसदृशंपतिमाशु
द्विजात्मजा ॥ ३५ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येऋषिभिःकृतमृषिपुत्र्याःसांत्वनंनामचतुर्थोऽध्यायः ॥ ४ ॥ श्रीकृष्णउवाच ॥ निवसंत्यास्त
तस्तस्यास्तस्मिन्नेवतपोवने ॥ शोकेनचपराक्लिष्टांहिमाक्तांपद्मिनीमिव ॥ १ ॥ शून्यकाननमासन्नांयूथभ्रष्टांमृगीमिव ॥ गलद्बाष्पौघपूराक्तज्वलद्धृदय
पंकजाम् ॥ २ ॥ निःश्वासपरमांदीनांसंरुद्धामुरगीमिव ॥ चिंतयंतीमपश्यंतींदुःखपारंकृशोदरीम् ॥ ३ ॥ तामाससादभगवान्भविष्यबलनोदितः ॥
यदृच्छयाऋषिर्दृप्तःपरमःकोपनोमुनिः ॥ ४ ॥ तद्विलोकनमात्रेणतप्येदपिशतक्रतुः ॥ जटाकलापसंछिन्नःसाक्षादिवसदाशिवः ॥ ५ ॥ यस्त्वज्जनन्या
राजेंद्रशैवेतिचप्रसादितः ॥ निर्जराकर्षिणींविद्यांददावस्यैसुपूजितः ॥ ६ ॥ येनाहमपिभूपालचक्रेचर्चिकपादुकः ॥ कोपेनपीडितोऽत्यर्थंनयथान्यःपुमा
न्कचित् ॥ ७ ॥ रथेसंयोजितोराजन्रुक्मिण्याःकुसुमाकरे ॥ जलमर्थयतीबालातृषयापीडितात्यलम् ॥ ८ ॥ तीव्रकोपपरीतांगःशशापवनितांतदा ॥ ॥ ४ ॥
साक्षाद्रुद्रांशसंभूतःकालरुद्रइवापरः ॥ ९ ॥ अत्रेरुग्रतपःकल्पवृक्षेदिव्यंफलंमहत् ॥ पतिव्रताशिरोरत्नानसूयागर्भसंभवः ॥ १० ॥ दुर्वासानाममे

धावीब्रह्मेवकिलमूर्तिमान् ॥ नैकतीर्थजलक्लिन्नजटाभासुरसच्छिराः ॥ ११ ॥ तमालोक्यसमायांतंब्राह्मणीशोकसागरात् ॥ उन्मज्ज्यनेत्रकमलेसुस्वरा
मृदुभाषिणी ॥ १२ ॥ ववंदेचरणौमूर्ध्नासुनेरद्भुतकर्मणः ॥ नत्वास्वाश्रममानीयवाल्मीकिर्जानकींयथा ॥ १३ ॥ अपूजयद्वरारोहाऋषिराजंतप
स्विनी ॥ अर्घादिक्रिययासम्यग्वन्यैरुच्चावचैरपि ॥ १४ ॥ सत्कृत्यसुखमासीनमुपासांचक्रईश्वरम् ॥ भामिनीस्वागतंवाक्यमुवाचशुभलो
चनी ॥ १५ ॥ स्वागतंतेस्तुभगवन्नत्रिगोत्रसमुद्भव ॥ वृंदारकवृंदवंद्यपदपद्ममुनीश्वर ॥ १६ ॥ लसत्कदंबकिंजल्कजटाभारविराजित ॥
सुरासुरैर्वंदनीयब्रह्मार्चिंतनतत्पर ॥ १७ ॥ यन्नामस्तुतिमात्रेणह्यनेकदुःखसंक्षयः ॥ सर्वसिद्धिसमुद्रेकःसद्योभवतिदर्शनात् ॥ १८ ॥
त्वांदृष्ट्वाचैवनत्वाचसर्वपापक्षयोभवेत् ॥ मदीयमृषिशार्दूलयेनप्रश्नेममस्पृहा ॥ १९ ॥ कुतोधिगमनंसाधोतीर्थादिनिमिषेणकिम् ॥ अभाग्यायाम
मपुनर्भाग्यलेशेनप्राप्तवान् ॥ २० ॥ अथवामत्पितुःपुण्यप्रवाहप्रेरितःकिमु ॥ श्रीमद्विचलनंब्रह्मन्नृणामघविनाशकृत् ॥ २१ ॥ गृहांधकूपेपतितांस्वैःपा
पैर्दुष्टचेतसाम् ॥ भवादृशांपदस्पर्शस्तीर्थकोटिसमोभवेत् ॥ २२ ॥ उक्त्वावाक्यंद्विजसुतातस्थौतूष्णीमवाङ्मुखी ॥ सुस्मितंमुनिराहेदंदुर्वासागिरिशां
शजः ॥ २३ ॥ साधुसाधुद्विजसुतेकुलमप्युद्धृतंत्वया ॥ धर्मिष्ठस्यचमेधावेःपरस्याशिवपूजने ॥ २४ ॥ कैलासादहमागच्छंज्ञात्वातेधर्मशीलताम् ॥
त्वच्चरित्रेणप्रीतोऽहंत्वत्पितुःस्नेहयंत्रितः ॥ २५ ॥ त्वदाश्रमपदंप्राप्तस्त्वयासंपूजितोह्यहम् ॥ गमिष्यामिवरारोहेश्रीमद्बदरिकाश्रमे ॥ २६ ॥ द्रष्टुंनारा
यणंदेवंनरयुक्तमनुद्धतम् ॥ तपश्चरंतमेकाग्रमनुग्रंचिरसंस्थितम् ॥ २७ ॥ द्रष्टुकामोस्मिसुश्रोणितवदुःखंमहत्तरम् ॥ अंतराधिपदीप्तेनवह्निनासाप्रदीपिता
॥ २८ ॥ कन्योवाच ॥ ऋषेत्वद्दर्शनादेवसंशुष्कःशोकसागरः ॥ परितोपिशुभंभावियत्संतुष्टस्त्वमात्मना ॥ २९ ॥ किन्नवेत्सितपःश्लाघिन्ममशोक
स्यकारणम् ॥ हर्षदंतुनमेकिंचिद्दृश्यतेत्वंविचारय ॥ ३० ॥ नमातानपिताभ्रातानमित्रंनचबांधवः ॥ कुमारोनचमेभर्तासकालोप्यतिवर्त्तते ॥ ३१ ॥ यांयां
दिशंप्रपश्यामिसासाशून्याविभातिमे ॥ कोप्युपायःसदृष्टोस्तियेनमेदुःखसंक्षयः ॥ ३२ ॥ दिशतंशिवसंभूतवृषलीयेननोभवम् ॥ भवेस्मिंस्तवशापोस्तिमामे
कश्चशुभप्रदः ॥ ३३ ॥ चेद्भवेन्मेचजनकःसोप्यकालेदिवंगतः ॥ सर्वथाल्पसुखिन्येवाहंचैकाप्यतिदुःखिता ॥ ३४ ॥ वाक्यमुक्त्वापिककंठीकिंचिन्नोवा
चसुंदरी ॥ ध्यात्वोवाचऋषिर्देवींकारुण्यभररंजितः ॥ ३५ ॥ ऋषिरुवाच ॥ शृणुसुंदरियत्तेनकस्यापिकथितंनमे ॥ वक्ष्यामितुभ्यंसुश्रोणित्वद्गुणेनसुयंत्रितः
॥ ३६ ॥ तृतीयेसुभगेसुभ्रुहायनेपरमाद्भुतः ॥ भविष्यतिवरारोहेमासोवैपुरुषोत्तमः ॥ ३७ ॥ यस्मिन्स्नातोनरस्तीर्थेमुच्यतेभ्रूणहत्यया ॥ अपिस्नानान्महापुण्ये
मासेकिमुतसाधनात् ॥ ३८ ॥ नायंतुल्योभवेद्देविमासैरन्यैःसुशोभनैः ॥ साधनानिसमस्तानिऋषिप्रोक्तानिसुंदरि ॥ ३९ ॥ मासस्यतस्यनार्हंतिकलाम

पिचषोडशीम् ॥ सर्वैंमासास्तथापक्षाःसर्वाण्यन्यानिभामिनि ॥४० ॥ एकस्मिन्दिवसेस्नानमाहात्म्यंनानुयांतिहि ॥ अन्यदानस्यपुण्यंयद्धतंभवातिशोभ
ने ॥४१॥ जपोपवासदानानितदस्मिन्नेकसंख्यया ॥ सर्वथासर्वमासानांशिरःस्थानेव्यवस्थितः॥४२॥तस्मान्निषेवयाशुत्वंमासंवैपुरुषोत्तमम् ॥अत्यंतकै
टभारातिप्रियोयंभूसुरात्मजे ॥ ४३ ॥ मयापिसेव्यतेनित्यंयदाप्राप्नोतिभामिनि ॥ विष्णुनाम्नासविज्ञातःकोन्योभवितुमर्हति ॥ ४४ ॥ मुंचन्नाज्ञं
बरीषायक्रोधंकृत्वासुदारुणम् ॥ तदात्रातोस्यपुण्येनविष्णुचक्रात्सुदुःसहात् ॥ ४५ ॥ सोहंसक्तःसुनाभस्यतेजःपरमदारुणम् ॥ कोटिसूर्यप्रतीकाशं
ब्रह्मांडानांचभस्मकृत् ॥ ४६ ॥ युगांताग्निसमंतस्यभूरिशोदाहकस्यचित् ॥ मुक्तोमासप्रभावेनतेजसाहंसमेधितः ॥ ४७ ॥ नोचेद्धरिकरान्मु
क्तचक्रकोपाद्विमुच्यते ॥ यदिसाक्षाद्भवेद्देवःसहस्रनयनारिहा ॥ ४८ ॥ कश्चिदन्योपिवामोरुजीवन्यातिकथंचन ॥ तदाप्रभृतिवामांगि
विस्मयोमेमहानभूत् ॥ ४९ ॥ अहोह्येताहशोमासोनज्ञातःकेनहेतुना ॥ महामाहात्म्यवान्विष्णुर्येनायमुररीकृतः ॥ ५० ॥ तस्माद्भजत्वंसुश्रोणिश्रीमं
तंपुरुषोत्तमम् ॥ यस्मिंश्चीर्णव्रताःशश्वत्सौख्यसागरगामिनः ॥ ५१ ॥ दुःखध्वांतोग्रपुंजौघनाशेविद्धिहिभास्करम् ॥ तावदन्येप्रशंसंतिस्वात्मानंचव
रानने ॥ ५२ ॥नोदितःपातकध्वांतविध्वंसचतुरोरविः ॥ तत्साधनसहस्राणिनिरस्यत्वंद्विजात्मने ॥ ५३ ॥ केवलंहरिनामानंमासंतिष्ठस्वसर्वथा ॥ इत्युं
क्त्वासुनिशार्दूलोविररामसखिन्नवत् ॥ ५४ ॥ नशशाकपुनर्वक्तुंमासमाहात्म्यमद्भुतम् ॥ ५४ ॥ श्रीकृष्णउवाच ॥ इतिश्रुत्वाऋषिबालाबाल्यान्मो
हाच्चगर्वतः ॥ ५५ ॥ भाविनोपिबलाच्चैवसासूयापूरिताभवत् ॥ अन्यग्रंथमतंगृह्यानादृत्यमुनिभाषितम् ॥ ५६ ॥ क्रूरमंतककल्पंहिसाचिंतयांतिसुंदरी
कन्योवाच ॥ नमह्यंरोचतेब्रह्मंस्त्वदीयोवाक्यविस्तरः ॥५७॥ कथंमाघादिमासांस्त्वमतिक्रम्यावभाषसे ॥ नवैत्वय्युपपद्येतसर्वशास्त्रोपमर्दनम्॥५८॥
कथंकार्तिकमासंत्वमूनंवदसितद्वद ॥ चांद्रायणादिकंत्यक्त्वाविरुद्धंकिंप्रभाषसे ॥ ५९ ॥ वैशाखःकिमुनोदाताफलानांचरितव्रतः ॥ सदाशिवादयोदे
वाःसिद्धिदानभवंतिकिम् ॥ ६० ॥ भगवान्रुक्मिणीनाथःसेवितोनसुखप्रदः ॥ अथवासुविमार्तंडोदेवःप्रत्यक्षदर्शनः ॥ ६१ ॥ दर्शनात्स्पर्शनाद्ध्याना
दुःखौघौघविनाशनः ॥ किंवाष्टादशदोर्दंडराजिताजगदंबिका ॥६२॥ शाकंभरीमहादेवीकष्टहंत्रीभवेन्नहि ॥ सिंदूरारुणसद्गात्रशुंडपुष्कराराजितः॥६३॥
दुःखहानभवेत्किंतुश्रीमान्विघ्नविनाशकृत् ॥ व्यतीपातादिकान्योगानुपरागानपिप्रभो ॥ ६४ ॥ पुण्ययोगानपिसर्वान्संक्रांतिंह्ययनेपिच ॥ तपांस्यन्या
निनियमानुपास्यानपिदेवताः ॥६५॥ सर्वानुल्लंघ्यवदतस्त्रपातेकिंनजायते ॥ किमाश्रित्यत्वयाविप्रमलमासःप्रकाशितः ॥ ६६ ॥ नैवंवक्तुंभवान्युक्तःसर्व ॥ ९ ॥
साधननिंदनः॥वेद्म्यहंसर्वदुःखानांपारदंभवसागरे॥६७॥नान्यंपश्यामिभूदेवचिंतयंतीदिवानिशम् ॥ रामाद्वैजानकीजानेःकौशल्यानंदवर्द्धनात् ॥ ६८ ॥

अथवास्वर्धुनीपूरधारिणःशंकरादृते ॥ बाणासुरदशग्रीवादयःसिद्धिपुरोगताः ॥ ६९ ॥ पुत्रपौत्रमयींसिद्धिंयथेष्टांमावपूजनात् ॥ भगवान्देवकीपुत्रो
ब्रह्मण्योभक्तवत्सलः ॥ ७० ॥ सदाशिवप्रसादेनलेभेपुत्रान्सहस्रशः ॥ विहायतंमहादेवंधूर्जटिंशशिशेखरम् ॥ ७१ ॥ एतान्विहायसततंकथमेनंप्रशंससे ॥
नैतन्मेरोचतेब्रह्मंस्तववाक्यंनसंशयः॥७२॥एवमुक्तस्ततोविप्रपुत्र्यासक्रोधनोमुनिः॥जाज्वल्यमानोवपुषारोषसंरक्तलोचनः॥७३॥जज्वालाज्यसरिद्धारा
सिक्तकालाग्निवन्मुनिः ॥ नोवाचकिंचित्कुपितश्चलत्क्लिष्टकलेवरः ॥७४॥ मुहूर्तमात्रंतत्रैवतस्थौदिगवलोकनः॥अथाबभाषेभगवांस्तद्वाक्यमनुशीलयन्
॥७५॥ कुपितोपिशशापैनांनैवमित्रसुताहिसा ॥ कुमारीललिताबालादुःखदग्धानिराश्रया ॥ ७६ ॥ किंकरिष्यातिमच्छापदग्धाप्रागेवभर्जिता ॥ ऋषि
रुवाच ॥ भोभोबालेनमेकोपस्त्वयित्रातातततःशुभे ॥७७॥ येनचेतःप्रसन्नंस्यात्तत्कुरुष्वशुचिस्मिते ॥ नाहंवक्ष्यामितेकिंचित्त्वत्पुरःशुभशंसिवत्॥७८॥
नोपचारस्त्वदीयोस्तिमनागपिकथंचन ॥ भाग्यहीनेनरेव्यर्थउपदेशोभवेच्छुभे ॥७९॥ मुमूर्षौभेषजंयद्वत्क्लीवेदारपरिग्रहः ॥ अंधाग्रेचयथादर्शःपुस्त
कश्चजडाग्रतः ॥८०॥ मरौकूपखनिर्यद्वद्गतासोर्भूषणक्रिया ॥ ऊषरेबीजनिक्षेपःसागरेवृष्टिरुद्गता ॥८१॥ कृतघ्नेचमित्रकृपासागरेचयथापयः ॥ तत्सर्वं
निष्फलंयद्वद्दुर्जनेसद्वचस्तथा॥८२॥ यत्तेचेतसिसंजातंसुष्ठुभाग्यविवर्जिते॥तत्त्वंकुरुष्वसततंमद्वचोमयिसंस्थिते ॥८३॥ परंकिंचित्समाख्यास्येशृणुतन्नि
र्व्यलीकतः॥विष्णुश्रेयस्यमासस्ययत्त्वयानादरःकृतः॥८४॥सर्वथातत्फलंलभ्यमिहवापरजन्मनि॥गच्छामितेभ्यनुज्ञातोविशालांबदरीमहम्॥८५॥शापं
दद्मिनवामोरुमित्रोमेत्वत्पितायतः ॥ मित्रद्रोहोभवेन्मह्यंशप्तायांत्वयिसर्वथा ॥ ८६ ॥ तेनमेसंयतःकोपःकालकूटसमाकृतिः ॥ स्वस्तितेस्तुगमिष्यामि
मामेकालव्ययोभवेत् ॥ ८७ ॥ शुभंशुभेतरंभाविनकेनाप्यवगम्यते ॥ ८८ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येदुर्वाससऋषिपुत्र्यासहसंवादोनामपं
चमोऽध्यायः ॥५॥ श्रीकृष्णउवाच ॥ इतिवाचमुदीर्यासौजगामात्रिसमुद्भवः ॥ क्षणादृषिसुताजातानिष्प्रभामुनिवाक्यतः ॥१॥ विमृश्यसुचिरंकालंकिंनु
कार्यमयाधुना ॥ आराधयामिदेवेशंतपसापार्वतीपतिम् ॥ २ ॥ दुःखाग्नौदुःखकृत्कुंडेदुःखसुस्रुवसंभृते ॥ दुर्वासादुःखहोतायंदुःखाज्यंहुतवान्किल
॥ ३ ॥ समिद्धपावकस्यास्यसेक्तानास्त्यधुनांबुना ॥ सदाशिवादृतेशंभोर्दृढसंकटमोचनात् ॥ ४ ॥ इतिनिश्चित्यमनसाह्यार्षेयीकन्यकातदा ॥ अनादृ
त्यमुनेर्वाक्यंमुग्धादुर्वाससःशुभम् ॥ ५ ॥ समारभतकल्याणीतपःपरमदुष्करम् ॥ चिंतयंतीशिवंशांतंपंचवक्त्रंसनातनम् ॥ ६ ॥ भुजंगभूषणंदेवंनंदी
भृंगीनिषेवितम् ॥ चतुर्विंशतितत्त्वेशंगुणैस्त्रिभिरभिष्टुतम्॥७॥महासिद्धिभिरष्टाभिःप्रकृत्यापुरुषेणच ॥ महत्तत्त्वेनदीप्तेनह्यहंकारेणसंस्तुतम्॥८॥ चंद्र
कांत्यालसद्भालंजटाराजिविराजितम् ॥ चचारदुश्चरंबालातमुद्दिश्यसदाशिवम् ॥९॥ कर्तुंशक्यंनकेनापितपःपरमदारुणम् ॥ पंचानामग्निनांमध्येस्था

यिनीग्रीष्मगेरवौ ॥ १० ॥ हेमंतेशिशिरेशीतवारिकुंडनिवर्त्तिनी ॥ राजतेचमहाभागापद्मिनीवतुकेवला ॥ ११ ॥ शिरोधःप्रसृतश्यामनीलालकविगुं
फिता ॥ जंबालवल्लरीपुंजपरितःपरिवेष्टिता ॥ १२ ॥ ब्रह्मरंध्रोद्गतश्रीमद्धूमराजिप्ररोहिणी ॥ नलिनीसेव्यमानेवहंसीवसततंस्थिता ॥ १३ ॥ वपुषादी
प्यमानेनसेवमानासदाशिवम् ॥ संध्ययोरुभयोस्तन्वीधूम्रपानकृतस्पृहा ॥ १४ ॥ विशंकासुरसंघानांकालेनाल्पेनसाभवत् ॥ दुर्द्धर्षादिविजैःसिद्धैः
स्पृहणीयामहर्षिभिः ॥ १५ ॥ तपस्यायांप्रवृत्तायांतापस्यांनृपभूषण ॥ गतान्यष्टसहस्राणितदाराजन्यपूजित ॥ १६ ॥ संतुष्टस्तपसातस्याभगवान्भ
गनेत्रहा ॥ प्रत्यक्षदर्शनोजातस्तस्यानार्याःसमीपगः ॥ १७ ॥ वनितावनताभूत्वाननामगिरिजापतिम् ॥ गजषण्मुखनंदीशैःसुसेव्यंसुरपूजितम् ॥
॥ १८ ॥ मानसैरुपचारैस्तुपूज्यंविश्वेश्वरंविभुम् ॥ तुष्टावजगतांनाथंभक्तिप्रह्वेनचेतसा ॥ १९ ॥ कन्योवाच ॥ विभोशैलजावल्लभप्राणनाथप्रभोभर्गभू
तेशगौरीशशंभो ॥ नमःसूर्यसोमाग्निनेत्रांबिकेशमदाधारमुंडांगमालिन्नमस्ते ॥ २० ॥ जटाजूटगुच्छोल्लसत्स्वर्धुनीभाभराशुभ्रितानीलकर्णावतंसिन् ॥ लस
द्रत्नकोटिद्युतिद्योतितांगभुजंगाधिनाथायतुभ्यंनमस्ते ॥ २१ ॥ असावद्भुतानेकपुण्यप्रसंगैःसमाश्रीयतेमानवैर्दानवैर्वा ॥ प्रभोवाण्यगम्यप्रभावस्तवास्तेकथं
वर्णयेकेवलंत्वांनतास्मि ॥ २२ ॥ कथंवर्णयामीशतेवैगुणौघान्मुखेवैखरीभारतीमेल्पवर्णा ॥ सहस्रैर्मुखैर्युक्तनागाधिपोपिगुणान्वर्णितुंवैप्रभुस्तेनमोस्तु ॥ २३ ॥
त्वदीयंप्रसन्नःपदाब्जंपुरारेनवैविद्यतेतस्यसंसारभीतिः ॥ दयालुःशरण्यागतोद्धारकर्त्ताविभोधूर्जटेपाहिमांह्यार्त्तबंधो ॥ २४ ॥ नरोनैकतापाभिभूतां
गपीडः परंघोरसंसारमार्गेप्रपन्नः ॥ खलव्यालकालोग्रदंष्ट्राभिदष्टोविमुह्येद्भवंतंशरण्यंनयाति ॥ २५ ॥ सदाशर्वसर्वागमोत्तीर्णचित्तोविभुंशंकरंनीलकंठं
प्रपन्नः ॥ तदैवाशुसंछिन्नकर्मोग्रजालःपरंब्रह्मभूयायजंतुःप्रयाति ॥ विभोयेनबाणःस्वकीयीकृतस्तेमृताजीवितालर्कभूपालपुत्री ॥ २६ ॥ दयालोकृपा
लोकपर्दिन्यथेशविदर्भांगजायाःकृतंवांछितंते ॥ तथामामकेमानसेयोऽभिलाषःकुरुत्वंभवानीशसाक्षात्समेत्य ॥ २७ ॥ जनःप्राकृताघौघसंप्रुष्टदेहोद
यालुंशरण्यंनयातःसुरेशम् ॥ विभोनाथभूतेशचंडीशभर्गभवत्राणमृत्युंजयोक्षेशगामिन् ॥ २८ ॥ स्तुतिंनैवकर्तुंसमर्थाबलाहंपुरारेंधकारेनमस्ते
नमस्ते ॥ २९ ॥ श्रीकृष्णउवाच ॥ तमीडचैवंह्युपरताशर्वेशर्वांगमीश्वरम् ॥ सुसंतुष्टस्तयास्तुत्याजगादवचनंहरः ॥ ३० ॥ प्रसन्नवदनांभोजः
प्रपन्नपरवारिधिः ॥ अनेकदुःखसामुद्रशोषणेगस्त्यसन्निभः ॥ ३१ ॥ वदभामिनितेचैत्त्यंदह्मितेद्विजनंदिनि ॥ नित्यमद्भुततपासिरतासिवरव
र्णिनी ॥ ३२ ॥ सूतउवाच ॥ मुदितानादमाकर्ण्यसाक्षादश्वाकुलेक्षणा ॥ निदाघार्काशुसंतप्तोवारिप्राप्ययथाकृषः ॥ ३३ ॥ वरमन्वर्थयत्त
न्वीकामधन्वीषुमर्दिता ॥ पतिकामानाप्तसुखावहुसौख्यगतस्पृहा ॥ ३४ ॥ कुमार्युवाच ॥ संतुष्टोसिभवान्मह्यंयदित्वंप्रमथाधिप ॥ शिति

कंठममोद्देशंकुरुसत्यंवृषध्वज ॥ ३५ ॥ पतिंदेहिपतिंमह्यंपतिंपतिमहंवृणे ॥ पतिंदेहिमहाराजनान्यंमेचिंतितंहृदि ॥ ३६ ॥ विरराम तदार्षेयीशिवंप्रार्थ्यजगद्गुरुम् ॥ शर्वोप्युवाचवनितामेवमस्तुशुचिस्मिते ॥ ३७ ॥ पंचकृत्वस्त्वयाभद्रेयाचितोयंवरोधुना ॥ भविष्यंतिवरारोहेपतयःपंचभामिनि ॥ ३८ ॥ सुराःसकलधर्मज्ञाःसाधवःसत्यविक्रमाः ॥ यज्वानःस्वगुणख्याताःसत्यसंधाजितेंद्रियाः ॥ ३९ ॥ त्वन्मुखप्रेक्षकाःसर्वे भाविनोलोकपूजिताः ॥ येषामैश्वर्यंदेवानांस्पृहणीयंभविष्यति ॥ ४० ॥ अन्येषामपिदेवानांस्पृहणीयंभविष्याति ॥ त्वंभर्तृकामिनीरामाभविष्यस्यन्य भूमिजा ॥ ४१ ॥ सूतउवाच ॥ श्रुत्वैतत्कर्णकटुकंवाक्यंवाक्यविशारदा ॥ पुनरूचेशिवंदेवंमैवमस्तुजगत्पते ॥ ४२ ॥ एकायाःकिलकामिन्याएकएव पतिर्भवेत् ॥ पंचभर्तृमतीकाचिन्नदृष्टानश्रुताक्वचित् ॥ ४३ ॥ एकस्यपंचकामिन्यःपुरुषस्यभवंतिहि ॥ नतुनार्याभवेयुश्चभर्त्तारःपंचएवहि ॥ ४४ ॥ नैवंवक्तुंभवानर्हःसर्वथाह्यहिभूषण ॥ सर्वभूताशयज्ञस्त्वंकपर्दीशनकामये ॥ ४५ ॥ ततःप्रोवाचतांपंचशिरांस्याधूयशंकरः ॥ मास्तुतेस्मिन्भवेभीरु भाव्यंजन्मांतरेषुतत् ॥ ४६ ॥ अयोनिसंभवातस्मिन्भवित्रीत्वंतपोबलात् ॥ भर्तृसौख्यंसुविपुलंभुक्त्वाब्राह्मंपदंतव ॥ ४७ ॥ भाव्यन्यन्नचमेवाक्यं यदुक्तंतद्भविष्यति ॥ मक्षिकापादमात्रंहिविषंस्याद्विषमेवहि ॥ ४८ ॥ तथातुविहितालपापिक्रियातत्फलदाभवेत् ॥ तस्माद्विमृश्यकृत्यंहिविधेयंचैव तापसि ॥ ४९ ॥ दुर्वासामेप्रियामूर्त्तिर्ब्रह्ममूर्त्तिकृतश्रमः ॥ सत्वयावमतःपूर्वंसोपदेशोमुनीश्वरः ॥ ५० ॥ सकोपावृतसर्वांगोनिर्दहेज्जगतां त्रयम् ॥ त्वयाचातुर्यंशालिन्याब्रह्मतेजःप्रमर्दितम् ॥ ५१ ॥ परब्रह्मात्मकोमासोमासाद्यःपुरुषोत्तमः ॥ सोपिवामपदाक्रांतस्त्वयामानिनिमानतः ॥५२॥ अहंब्रह्माप्रजेशायेनारदाद्यामुनीश्वराः ॥ हरिवाजिपतंगाग्निसमीरणजलेश्वराः ॥ ५३ ॥ यन्निदेशाविधेयात्मातदाज्ञांकोविलंघयेत् ॥ ततःप्रियःखलु मासोयंनाम्नायःपुरुषोत्तमः ॥ ५४ ॥ सत्वयानैवगणितःख्यातोपिमुनिनासकृत् ॥ अतस्तेपंचनाथानांभविष्यंतिसुखोद्गमाः ॥ ५५ ॥ नान्यद्भाविसुखं सुभ्रुपुरुषोत्तमखंडनात् ॥ पुरुषोत्तममासस्यभक्तायभुविमानवाः ॥५६॥ ऐहिकामुष्मिकींसिद्धिंयातायास्यंतियांतिच ॥ वयंसर्वेपिगीर्वाणाःपुरुषोत्तमसे विनः॥५७॥ यस्मिन्संसेव्यमानेयंप्रीयतेमधुहाहरिः ॥ भजनीयंकथंमासंनभजामःसुमध्यमे ॥५८॥ इत्युक्तंचैवमेवाक्यंनैवमिथ्याभविष्यति ॥ परिपाल्या द्विजश्रेष्ठाःसदसद्वादिनोपिहि ॥ ५९ ॥ सेविताःसर्वदाभद्रेनिर्दहंत्यवमानिताः ॥ प्रतीतिर्द्विजवाक्येषुतेषांलोकाःसनातनाः ॥ ६० ॥ वदन्नेवंशितिकंठःसर्वप्रमथपूजितः ॥ क्षिप्रमंतर्दधेराजन्सहेरंबषडाननः ॥ ६१ ॥ शंशाकलेखांकितभालदेशेसदाशिवेंतर्दशिसंप्रयाते ॥ चिंताबबाधेमुनिराजकन्यां हत्वायथावृत्रहणंमुनीशाः ॥ ६२ ॥ इतिश्रीपद्मपुराणेश्रीकृष्णयुधिष्ठिरसंवादेपुरुषोत्तममाहात्म्येसदाशिवाद्वरप्राप्तिर्नामषष्ठोऽध्यायः ॥ ६ ॥ श्रीकृष्ण

उवाच ॥ ॥ एवंगतेशिवेराजन्सावालाविगतप्रभा ॥ निःश्वासपरमादीनाशुष्यन्नेत्राकृशोदरी ॥ १ ॥ तस्यानयनजंवारिवह्वप्यप्राप्यभूतलम् ॥ अत्यं
तातपसंतप्तंवक्षोऽसिश्चचभारत ॥ २ ॥ दुःखोदधेश्चपारंवैकदाचिन्नापसुंदरी ॥ अत्यंतायासकृत्येनापीहवंध्यातनूजवत् ॥३॥ शोकसंतापनिश्वासशुष्य
द्वदनपंकजा ॥ सर्वांगेदह्यमानासादावदग्धालताइव ॥ ४ ॥ हाहाकारपरानित्यंकथयन्परिधावति ॥ आत्मानंदर्शयामासजडांधवधिरोपमम् ॥ ५ ॥
वाच्यमानापिनब्रूतेश्राव्यमाणाशृणोतिन ॥ नेच्छयाचरतिक्वापिपवनोद्धूततूलवत् ॥ ६ ॥ एवंमार्गेवर्त्तमानाकियान्कालोऽत्यजायत ॥ जगद्वैभक्षयन्का
लःकदाचिद्दषिकन्यकाम् ॥ ७ ॥ सहसाससमापन्नःफणीवाखुनिवेशनम् ॥ ननंदांतकमायांतंज्ञात्वैतत्प्रियजल्पति ॥ ८ ॥ ममायमेवदुःखांतोमान्यः
सृष्टोसिवेधसा ॥ इतिब्रुवतिकालेनवशंनीताद्विजांगजा ॥ ९ ॥ यथासमीरणोद्धूतामेघयुक्तावलाकिनी ॥ तदाश्रमपदेनष्टातपसादग्धकल्मषा ॥ १० ॥
एतस्मिन्नेवसमयेद्रोणायाभिचरन्क्रुधि ॥ याजोपयाजविप्राभ्यामास्थितोदारुणाकृतिः ॥ ११ ॥ चकारयज्ञंसुभृशंरक्तचंदनचर्चितम् ॥ क्रूरभावसमा
विष्टोब्राह्मणेकृतमर्षणः ॥ १२ ॥ हूयमानेचहवनेब्राह्मणैर्वेदपारगैः ॥ जज्वालपावकस्तत्रहोमेतस्मिन्युधिष्ठिर ॥ १३ ॥ ततश्चटचटाशब्दोविनिष्क्रांतो
विभावसोः ॥ निःससारोज्ज्वलद्गात्रावेदिमध्यादनिंदिता ॥ १४ ॥ सेयंद्रुपदशार्दूलतनयावोरहोगता ॥ द्रौपदीचंद्रकांतीचह्यार्षेयीयाभवत्पुरा ॥ १५ ॥
लब्धार्जुनेनपांचालीसर्वराजन्यमंडले ॥ तृणीकृत्वानृपसुतान्दीर्घवाहूननेकशः ॥ १६ ॥ सेयंकचग्रहप्राप्तादुःशासनकराग्रगा ॥ वचांसिकर्णशूलानिश्रा
वितावरवर्णिनी ॥ १७ ॥ मयाचोपेक्षिताराजन्पुरुषोत्तमहेलनात् ॥ यदाक्षेपेप्रवृत्तोसावंशुकस्यपृथात्मज ॥ १८ ॥ दुःशासनोदुष्टवुद्धिंर्धृतराष्ट्रतनू
द्भवः ॥ प्रदत्तानितदाराजन्मयावासांस्यनेकशः ॥ १९ ॥ सदामयिकृतस्नेहामामेतिप्रियजल्पति ॥ मामेवध्यायतीनित्यंसाध्वीगुणविभूषणा ॥ २० ॥
यदावभाषेराजेंद्रइतिवाचःसुपेशलाः ॥ ताःश्रुतामेमहाबाहोदयार्द्रीकृतचेतसा ॥ २१ ॥ मातानबंधुःसहजोथनेतासख्योनजामिर्नचभागिनेयः ॥ नेष्टः
सुहृद्वर्गतनूजवर्गस्तस्माद्धृषीकेशत्वमेवरक्ष ॥ २२ ॥ तदामेस्मरणंजातंपांचाल्याःशत्रुकर्शन ॥ तेननालोकितांतन्वींस्रस्तवस्त्रांसभागताम् ॥ २३ ॥
वनेवासोतिदुःखार्तःशत्रुलंभःसुदारुणः ॥ उपेक्षितोमयाराजन्मंत्प्रियोपेक्षणेनवै ॥ २४ ॥ यथायंमत्प्रियोमासस्तथेमेद्वादशापिन ॥ सर्वदासुरसेव्यो
यंमानुषैःकिमुतापरैः ॥ २५ ॥ तद्राजन्यवरश्रेष्ठतत्तथैवभविष्यति ॥ शिवेनोक्तंवचःसत्यंनकृष्णासुतसौख्यभाक् ॥ २६ ॥ सूतउवाच ॥ शनैस्तद्वचनं
श्रुत्वाहरिस्त्रैलोक्यपावनः ॥ पुनस्तांसांत्वयामासयज्ञसेनसुतांप्रियाम् ॥ २७ ॥ धृष्टद्युम्नानुजेबालेपश्यसित्वंवरानने ॥ वर्षेचतुर्दशेदेवियद्राव्यंगजगा
मिनि ॥ २८ ॥ व्यालोकिचिकुरव्रातस्तवायंयैःकृशोदरि ॥ तन्नारीणांवरारोहेनिर्वापिष्येऽलकानहम् ॥ २९ ॥ सुयोधनादिभूपालान्सर्वान्नेष्येयमक्षयम् ॥

इतिसत्यंब्रवीम्यद्यत्वंजानीहिसुमध्यमे ॥ ३० ॥ नप्रियामेतथालक्ष्मीःप्रियोनापिहलायुधः ॥ नतथादेवकीदेवीप्रद्युम्नोनैवसात्यकिः ॥ ३१ ॥ नानि
रुद्धःसुपर्णोवानचचक्रंसुदर्शनम् ॥ नमेचतुर्भुजंरूपंप्रियंतादृक्सुमध्यमे ॥ ३२ ॥ यथावैमेप्रियाभक्तास्तादृङ्मेनास्तिकिंचन ॥ त्रिषुलोकेषुयद्वस्तुभक्त
तुल्यंनविद्यते ॥ ३३ ॥ येनमेपीडितोभक्तस्तैरहंशतशःशुभे ॥ द्वेष्योमेनास्तितत्तुल्योयन्मेविप्रकृतोजनः ॥ ३४ ॥ समाश्वसिहिसुश्रोणिभविष्याति
सुखंतव ॥ नादत्तंप्राप्यतेस्वप्नेकदापिशशशृंगवत् ॥ ३५ ॥ समाश्वास्यद्रुपदजामुवाचमधुसूदनः ॥ अजातशत्रोधर्मज्ञसर्वधर्मभृतांवर ॥ ३६ ॥
राजन्मामनुजानीहियास्याम्यद्यकुशस्थलीम् ॥ सीरपाणिर्महाबाहोयमुनाकर्षणोबली ॥ ३७ ॥ आहुकोवासुदेवश्चगदसांबोद्धवादयः ॥ देवकीचमहा
भागारौक्मिणेयोथसारणः ॥ ३८ ॥ सर्वेतेऽनिमिषैर्नेत्रैर्ममागमनकांक्षिभिः ॥ मन्मार्गेसुक्तनयनाश्चितयंतोदिवानिशम् ॥ ३९ ॥ ॥ सूतउवाच ॥ ॥ इत्यु
क्तवंतंदेवेशंकथंचित्पांडवाग्रजः ॥ कृष्णप्रयाणकातर्याद्गद्गदाश्रुप्रमुक्तवान् ॥ ४० ॥ जीवनंविष्णुभक्तानांहरिरेवचनेतरत् ॥ पुनर्दर्शनमल्पेनकाले
नास्तुगदाग्रज ॥ ४१ ॥ देवकीनंदनश्रीमानस्माकंजीवनंभवान् ॥ पांडवानांहरिर्नाथोजगत्येतत्प्रतिष्ठितम् ॥ ४२ ॥ सदानःपाहिदाशार्हमानो
विस्मरणंकुरु ॥ अस्मच्चेतःसरोजानांषट्पदोस्तुभवान्विभो ॥ ४३ ॥ असकृत्पांडुपुत्रेषुगृणत्स्वेवंयदूद्वहः ॥ प्रायाद्द्वारवतींब्रह्मन्नानर्त्तजनपूजितः ॥ ४४ ॥
गतेकौमोदकीबाहौप्राणनाथेजगत्प्रिये ॥ राजापिभ्रातृसहितःपर्यतप्यद्द्विजोत्तम ॥ ४५ ॥ चचारानेकतीर्थानिचिंतयन्पुरुषोत्तमम् ॥ पुनःपुनश्चराजें
द्रोविस्मितेनांतरात्मना ॥ ४६ ॥ भीमादीननुजान्सर्वानुवाचधीमतांवरः ॥ श्रुतंभवद्भिर्वचनंविष्वक्सेनस्यसत्तमाः ॥ ४७ ॥ अहोमासस्यमाहात्म्यं
यदुक्तंशार्ङ्गधन्वना ॥ कथंसौख्यंहिलभ्येतनाभ्यर्च्यपुरुषोत्तमम् ॥ ४८ ॥ संपूज्योभारतेवर्षेसंपूज्यःश्रेष्ठएवसः ॥ देवताभिःपूजनीयोभाग्यवान्वैधरातले
॥ ४९ ॥ विविधैर्नियमैर्येषांहरिपूजाविधानकैः ॥ साधनैर्मासोविगतःपुरुषोत्तमएवसः ॥ ५० ॥ अहोमासस्यमाहात्म्यंयदुक्तंचक्रपाणिना ॥ देवा
नामपिदुष्प्रापंकिंपुनर्मानुषेजने ॥ ५१ ॥ एवंवदन्भूमिपतिर्बभ्रामबहुलाःसमाः ॥ तदंतेराज्यमतुलमापकृष्णप्रसादतः ॥ ५२ ॥ इतिश्रीपद्मपुराणेपुरुषो
त्तममाहात्म्येपुरुषोत्तममहिमप्रशंसनंनामसप्तमोऽध्यायः ॥ ७ ॥ सूतउवाच ॥ एवंभूतोधिमासोयंमहापापप्रणाशनः ॥ महिमानंयस्यवक्तुंनालंशक्रश्चतु
र्मुखः ॥ १ ॥ मासस्यास्यप्रसादेनपुराराजर्षिसत्तमः ॥ दृढधन्वाइतिख्यातोह्यवापमहतींश्रियम् ॥ २ ॥ भोगांतेजगतांनाथंप्राप्तःपारंभवांबुधेः ॥ पुरापु
त्रवियोगात्तव्याधीराजाधरातले ॥ ३ ॥ संप्राप्यसौख्यसीमानंमहिम्नःपुरुषोत्तमात् ॥ एतन्मासस्यमाहात्म्यमतुलंमुनिसत्तम ॥ ४ ॥ नाहंवक्तुंसमर्थो
स्मिमहिमानंभृगूद्वह ॥ अप्रमेयबलोमासोयथानारायणोहरिः ॥ ५ ॥ जानीहिमुनिशार्दूलनैतत्तुल्योस्तिकश्चन ॥ पुरुषोत्तममासस्यकृष्णद्वैपायना

दहम् ॥ ६ ॥ शृण्वन्गुणस्यविस्तारंवक्तुंनैवशशाकसः ॥ कोन्योमहिम्नोभुवनेसर्वमासशिरोमणेः ॥ ७॥ माहात्म्यमखिलंवेत्तियस्यनारायणःस्वयम् ॥
यस्मिञ्ज्ञातेभवेद्विद्वान्कोटियज्ञमिदंफलम् ॥ ८ ॥ ॥ शौनकउवाच ॥ ॥ कथयस्वकथामेतांसूतसाक्षाज्जगत्पते ॥ पुरुषोत्तममासस्यगुणान्वदम
हाभुज ॥ ९ ॥ विस्तराच्छ्रोतुकामानांसुराज्ञोदृढधन्वनः ॥ पुरुषोत्तममाहात्म्यात्कथमापसुखानिसः ॥ १० ॥ कथंवैकुंठनाथस्यपदंसाक्षाज्जग
त्पतेः ॥ अलंबुद्धिर्नमेतातकथापीयूषपानतः ॥ ११ ॥ ततोविस्तरतोब्रूहिकथामेतांसुदुर्लभाम् ॥ कृतक्षणोस्म्यहंसूततुष्यामिगदतस्तव ॥ १२ ॥
अस्मद्भाग्यप्रसंगेनअद्यसंदर्शितोभवान् ॥ चिरसंभृतपापस्यक्षयंनेतुंमहाभुज ॥ १३ ॥ श्रुत्वाभार्गववाक्यानांसौकुमार्यमनुत्तमम् ॥ सूतःप्रोवाचसं
हृष्टोमुनीनांसुखयन्निव ॥ १४ ॥ शृणुशौनकवक्ष्यामिकथांपुण्यांद्विजेश्वर ॥ व्यासवक्त्रसमुत्पन्नांस्वर्धुनीमिवपाविनीम् ॥ १५ ॥ नत्वाकृष्णायमुनये
यद्वाक्यजलमज्जनात् ॥ ब्रह्महापिसुरापोऽपिमुच्यतेनात्रसंशयः ॥ १६ ॥ अत्रसंशयिनःसर्वेचरंतोऽपिमृतायते ॥ सर्वजन्मसुदुर्भाग्याहीनप्रज्ञा
ह्यबुद्धयः ॥ १७ ॥ पराधीनागदग्रस्ताअपुत्राःस्युर्नसंशयः ॥ मृताःप्रयांतिविप्रेशकुंभीरौरवशूकरान् ॥ १८ ॥ युगकोटिसहस्रांतेप्रेतयो
निमवाप्नुयुः ॥ निर्जलेरण्यदेशेतेवसंत्यत्यंतदुःखिनः ॥ १९ ॥ येव्यासवाक्यविमुखानास्तिकाःकपटावृताः ॥ पुराणेदृढविश्वासाःकृष्णसायु
ज्यभागिनः ॥ २० ॥ शृणुदिव्यांकथांविप्रतद्राज्ञोदृढधन्वनः ॥ आस्तिकस्यसुव्रतस्यकृष्णभक्तस्यभूपतेः ॥ २१ ॥ आसीद्धैहयदेशस्यगो
प्ताश्रीमान्महीपतिः ॥ चित्रधर्मेतिविख्यातोधीमान्सत्यपराक्रमः ॥ २२ ॥ तस्यपुत्रोतितेजस्वीदृढधन्वेतिविश्रुतः ॥ ससर्वगुणसंपन्नः
सत्यवाग्धार्मिकःशुचिः ॥ २३ ॥ अवर्धतमहातेजाःसार्द्धंगुणगणेनसः ॥ शुक्लपक्षेमृगांकोवसर्वशत्रुनिबर्हणः ॥ २४ ॥ अधीत्यसांगान्निगमान्सर्व
शास्त्रविशारदः ॥ सकृन्निगदमात्रेणप्रागधीतमिवस्फुटम् ॥ २५ ॥ ददौबहुतरास्तेभ्योदक्षिणाःसुमनोहराः ॥ तेषामनुज्ञयाधीरोमुमुदेऽसौमहाबलः
॥ २६ ॥ मंत्रिणांब्राह्मणानांचप्रकृतीनांतथैवच ॥ सर्वेषांचमतंज्ञात्वापित्राराज्येऽभिषेचितः ॥ २७ ॥ गुरुंसंपूजयामाससततंराज्यमुक्पुनः ॥ चित्रवर्मा
पितंपुत्रंदृष्ट्वालेभेपरांमुदम् ॥ २८ ॥ अभिषिक्तंमहाबाहुमरातिगणशोषणम् ॥ निवृत्यविषयेभ्योऽक्षांश्चितयामासानिःस्पृहः ॥ २९ ॥ इतःप्रभृतिके
नाहंहेतुनाघोरसागरे ॥ संसारलक्षणेतीव्रविषयव्यालदुःखिते ॥ ३० ॥ दुराशाबहुलेक्रोधशितदंष्ट्राविदारणे ॥ आधिभिर्व्याधिभिश्चैवसर्वतःपरिवारिते
॥ ३१ ॥ आत्मानंमज्जयामीहयामिसन्मनसाहरिम् ॥ विश्वनाथंजगन्नाथंसर्वेषांसुखदायकम् ॥ ३२ ॥ सकृद्यन्नाममात्रेणश्वादोपिहरितांव्रजेत् ॥ तंया
मिशरणंविष्णुंवासुदेवंसनातनम् ॥ ३३ ॥ कृष्णसागरमक्षोभ्यंधिगिमंदुस्तरंनरैः ॥ आशातरंगबहुलंरागावर्त्तविभीषणम् ॥ ३४ ॥ वितर्कानेक

विहगंदारुणंजनभीकरम् ॥ शुभाशुभमनःसृष्टकल्पनावारिसंभृतम् ॥ ३५ ॥ चिंतोत्तुंगगिरिव्रातश्रोणीभिश्चविराजितम् ॥ कथंहरिपदंपोतविही
नस्तरितुंक्षमः ॥ ३६ ॥ पुत्रोयंममधर्मात्माश्रीमान्विनयकोविदः ॥ प्रजाःपालयतेनित्यंस्वीयान्पुत्रानिवौरसान् ॥ ३७ ॥ पितराविवजनःसर्वोवि
श्वस्तोस्मिन्सुतेमम ॥ महाभागवतःश्रीमान्विष्णुभक्तिपरायणः ॥ ३८ ॥ अतःपरंकिमत्रास्तिस्थैर्यचित्तप्रयोजनम् ॥ आराधयामिदेवेशंविष्वक्सेनं
जनार्दनम् ॥ ३९ ॥ ध्रुवोंऽबरीषःशर्यातिर्ययातिशिबिधुंधुरुः ॥ प्रतर्दनोवसुमनाहरिश्चंद्रोनलोमनुः ॥ ४० ॥ क्षेमधन्वारंतिदेवःशशबिंदुर्भगीरथः ॥
प्रियव्रतोभूरिषेणोयौवनाश्वोबलिर्नृगः ॥ ४१ ॥ भीष्मोयुधिष्ठिरःकर्णोदुष्यन्तोभरतोविभुः ॥ पृथुश्चैवमहाभागोमांधातासगरोंशुमान् ॥ ४२ ॥ दिली
पश्चपृषध्रश्चपुंडरीकःक्रतुध्वजः ॥ एतेचान्येपिराजानोधर्मकर्मकृतोद्यमाः ॥ ४३ ॥ भुक्तभोगामिमांत्यक्त्वाराज्यलक्ष्मीमतंद्रिताः ॥ नागास्त्वचं
यथाजीर्णांनिर्विशंकावनंगताः ॥ ४४ ॥ तत्रोपासेहरिंभक्त्याहृषीकेशंसनातनम् ॥ इतिनिश्चित्यमनसाजगामपुलहाश्रमम् ॥ ४५ ॥ तत्रैवजान
कीनाथंभक्त्यातिदृढयास्वया ॥ कंचित्कालंतपस्तप्त्वाचित्रवर्मामहीपतिः ॥ ४६ ॥ प्रापनारायणंदेवंगण्डक्युपवनेशुभे ॥ कालोत्तमांगमाक्रम्यप
दासव्येनभूमिपः ॥ ४७ ॥ जगामस्तुवतांतेषांशृण्वन्वाचःसुपेशलाः ॥ वैकुंठाख्यंहरिपदंयतोनावर्त्ततेगतः ॥ ४८ ॥ सुतादिकृतकृत्यानांनापेक्षांकुरुते
यतः ॥ दृढधन्वापिशुश्रावस्वपितुर्वैष्णवींगतिम् ॥ ४९ ॥ शोकहर्षपरीतात्माह्यकरोदौर्ध्वदैहिकीम् ॥ पितृभक्त्यामहीपालःसम्यग्द्विजवराज्ञया
॥ ५० ॥ पुष्करावर्त्तकेपुण्येनगरेतीवशोभिते ॥ पुपोषचप्रजाःसर्वानानागुणगणैर्युतः ॥ ५१ ॥ तस्यशीलवतीभार्यानाम्नावैगुणसुंदरी ॥ पुत्रीविदर्भ
राजस्यरूपेणाप्रतिमाभुवि ॥ ५२ ॥ पुत्रांस्तुसुषुवेदिव्यांश्चतुरानतिशोभितान् ॥ पुत्रींचारुमतींसर्वनामलक्षणपूजिताम् ॥ ५३ ॥ चित्रवा
क्चित्रबाहुश्चमणिमांश्चित्रकुंडलः ॥ सर्वेचमानिनःशूराविख्याताःपृथिवीतले ॥ ५४ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येदृढधन्वोपाख्यानेऽ
ष्टमोऽध्यायः ॥ ८ ॥ सूतउवाच ॥ दृढधन्वागुणैर्युक्तःशांतोदांतोजितेंद्रियः ॥ पुष्करावर्तकंनामनगरंतस्यधीमतः ॥ १ ॥ रूपवान्गुणवान्धन्वी
श्रीमान्प्रकृतिसुंदरः ॥ धार्मिकःसत्यवादीचसत्यसंधःसमःशुचिः ॥ २ ॥ वेदवेदांगधर्मज्ञोधनुर्वेदपरायणः ॥ सुनिर्जितारिषड्वर्गःशत्रुसंघविदा
रणः ॥ ३ ॥ वक्त्रलावण्यनिर्धूतस्फुरद्राकेशमंडलः ॥ यदीयकरकोदंडटंकाररवभयार्दिताः ॥ ४ ॥ रसातलंप्रयांत्यद्धात्रासान्निर्जरवैरिणः ॥
करालकरवालंयद्बाहुदंडोपलालितम् ॥ ५ ॥ यंदृष्ट्वावैरिणःसर्वेभ्रांतावैविरमंतिच ॥ यस्यटंकारवंश्रुत्वाशत्रूणांभयदायकम् ॥ ६ ॥ दिग्गजाश्च
दिशोयातास्त्रासादिवमदोद्धताः ॥ यन्नामश्रुतिमात्रेणविज्ञायदद्भवार्णवात् ॥ ७ ॥ पलायंतेदिशःसर्वाःशत्रवोनात्रसंशयः ॥ यद्यशःश्रवणंकृत्वाली

यंतेशत्रवोऽपरे ॥ ८ ॥ यन्नामश्रवणत्रासाद्वदंतिहिरिपुस्त्रियः ॥ यद्यशःश्रवणंनास्तिदृढधन्वनिशास्तरि ॥ ९ ॥ यत्प्रयाणोत्सवेनागाःपातालतलवा
सिनः ॥ जायंतेमारुताहाराश्चिंताकुलितचेतसः ॥ १० ॥ तुरंगस्यंदनगजपदातिपादचूर्णितैः ॥ रजोत्करैर्दिशांरोधःसूर्यमाच्छादयन्निव ॥ ११ ॥
यद्यत्रावसरंश्रुत्वागिरयोपिशशंकिरे ॥ तुरंगाणांपदाघातैर्नःकर्त्तात्रसरेणुताम् ॥ १२ ॥ इतिराजन्यशार्दूलेभूराज्यंशासतिप्रभो ॥ लोकाआनंदसं
युक्ताबभूवुःपुत्रपौत्रिणः ॥ १३ ॥ वांछावितरणाच्चासौबभौचिंतामणिर्यथा ॥ जगद्रंजनशीलेनशीतांशुरिवसोबभौ ॥ १४ ॥ कुबेरइवकोशाढ्यः
क्षमयापृथिवीसमः ॥ हरिभक्तियुतोनित्यंगांभीर्येजितसागरः ॥ १५ ॥ दंडधारणसामर्थ्येक्रोध्रेचैवयमोपमः ॥ पितामहसमःसाम्येतेजस्वीहव्यवाडिव
॥ १६ ॥ अनुल्लंघ्योगिरिरिवस्थैर्येचहिमवानिव॥कौशिकेनसमःशौर्येदृढत्वेमेरुणासमः ॥ १७ ॥ ब्रह्मोपदेशेनिपुणोसाक्षाद्वाचस्पतिर्यथा ॥ स्वकीय
रूपलावण्येमूर्तिमानिवमन्मथः ॥ १८ ॥ स्वसौंदर्यातिबाहुल्यान्मानिनीमानहारकः ॥ एकपत्नीव्रतधरोनान्यनार्यवलोककः ॥ १९ ॥ त्रैलोक्याभयदः
श्रीमान्कौसल्यानंदनोयथा ॥ सत्यपाशविनीतात्माहारिश्चंद्रइवापरः ॥ २० ॥ सदास्वधर्मनिरतःशिबिरौशीनरोयथा ॥ त्रेतायांयेनभूपेनकालःकृतसमः
कृतः ॥ २१ ॥ कस्तेनसमतामेतिप्रतिरूपोनकश्चन ॥ प्राकृतैर्विकृतैर्यज्ञैस्तर्पितोगरुडध्वजः ॥ २२ ॥ अत्युग्रकीर्तिमान्धन्वीकार्तवीर्यइवापरः ॥ य
स्मिन्राजनिलोकेषुभ्रमःकूपवटेष्वभूत् ॥ २३ ॥ बंधनंकेशपाशानांप्रजासुनकथंचन ॥ कामिनीसुरतेष्वेववस्त्राक्षेपोनचेतरः ॥ २४ ॥ हारःसुललनोत्तुं
गकुचकुंडलभूषणः ॥ रोषःकामिषुकामिन्याःप्रेमजोनतुवैरजः ॥ २५ ॥ वंचनंपुस्तकेष्वेवद्यक्षेषुमरणंतथा ॥ संभ्रमःक्रूरतादैन्यंमिथ्यालापस्तुकंचन
॥ २६ ॥ काठिन्यंनास्तिकत्वंचस्वल्पभाग्यंदरिद्रता ॥ भूतहिंसापरद्रोहःपरदाररतिःक्रुधिः ॥ २७ ॥ मालिन्यंमत्सरोत्यर्थचौर्यंदस्युत्वजाड्यता ॥
पशुन्यंकलहःक्रोधोऽनपत्यत्वंपरार्थना ॥ २८ ॥ अनार्यत्वंनिर्गुणत्वंलोलुपत्वमरातिता ॥ तृष्णादंभश्चकापट्यंकार्पण्यहरिसेवनम् ॥ २९ ॥ मातापित्रो
रसन्मानंवृत्त्यर्थेधर्मसेवनम् ॥ एतान्यविद्यमानानिदृढधन्वनिशासति ॥ ३० ॥ यथाशशविषाणानिमृगतृष्णाजलानिच ॥ यथागगनपुष्पाणियथावं
ध्यासुतोद्भवः ॥ ३१ ॥ स्वधर्मनिरताविप्राःश्रुतिस्मृतिपरायणाः ॥ दृढधन्वनिराजेंद्रेतस्मिन्राज्यंप्रशासति ॥ ३२ ॥ बुद्धींद्रियमनःप्राणतेजांसियस्य
भूपतेः ॥ अव्याहतान्यसौयावच्छशासक्षितिमेकराट् ॥ ३३ ॥ गदजंनभयंनृणामस्यराज्येश्रुतंनच ॥ नस्यात्तस्करपैशुन्यंनशत्रुसंभवंभयम् ॥ ३४ ॥
राज्ञोराजीवनेत्रस्यशूरस्यदृढधन्वनः ॥ गुणानवर्णितुंशक्यागुणिनःसर्वचेतसः ॥ ३५ ॥ महत्सुखंतस्यराष्ट्रेहरिभक्तियुतेशुभे॥हरिभक्तियुतान्येवदि ॥ ९ ॥
नान्यायांतियांतिच ॥ ३६ ॥ पुष्करावर्त्तकंनामपुरंसर्वसमृद्धिमत् ॥ यस्मिन्वसतिमेधावीदृढधन्वानराधिपः ॥ ३७ ॥ यथामरावतीस्वर्गेभातिदेवगणा

न्विता ॥ धरासंस्थापिसर्वांगशोभनानृपसापुरी ॥ ३८ ॥ वीथिचत्वरशोभाढ्याचैत्यगुल्ममनोहरा ॥ चित्रध्वजपताकाभिर्वारितातपसत्पथा ॥ ३९ ॥ मातंगानांमदैनैवसिक्तमार्गचतुष्पथा ॥ मालतीनांचमालाभिर्वासितानांमनोरमा ॥ ४० ॥ श्रीखंडामोदपानीयसिक्तमार्गाचसर्वतः ॥ नित्योत्सवविनोदार्थंकृतकौतुकतोरणा ॥ ४१ ॥ ज्वलत्कृष्णागुरूद्दामधूपपूजाविराजिता ॥ विचित्रविकसत्पुष्पदामभिस्त्वातिमंडिता ॥ ४२ ॥ विकीर्णकुसुमामोदमाद्यद्भ्रमरयूथपा ॥ गलद्गजेंद्रदानौघसिक्तमार्गचतुष्पथा ॥ ४३ ॥ तस्याःपुर्याश्वशोभावैनकेनाप्युपमीयते ॥ वलभीसंश्रितानक्रक्रीडाद्विजकूतारवा ॥ ४४ ॥ सप्तधातुदृढोत्तुंगप्राकारवरदुर्द्धरा ॥ सुरैरपिदुराराध्याकिंपुनर्भूचरैर्नरैः ॥ ४५ ॥ श्रितायावैस्वयंत्यक्त्वाकमलाकमलालयम् ॥ गृहाणियत्रदृश्यंतेनागराणांमहात्मनाम् ॥ ४६ ॥ रम्याणिरम्यरामाभिरावृतानिसहस्रशः ॥ यस्यांभांतिचतुर्दिक्षुगोपुरद्वाररोचिषः ॥ ४७ ॥ स्वर्णकीलैःकपाटैश्वखचितानेकशःशुभा ॥ द्वारेद्वारेषुसन्नद्धाःसुभटाःकोटिशःस्थिताः ॥ ४८ ॥ दिव्यवादित्रनिर्घोषबधिरीकृतदिग्गजा ॥ सौवर्णैराजतैःशुभ्रैःसुधावद्धवलैर्वरैः ॥ ४९ ॥ वैडूर्यकृतसोपानैर्नानामाणिगणोचितैः ॥ वज्रनद्धकपाटांगैरिंद्रनीलशतव्रजैः ॥ ५० ॥ स्फाटिकाट्टालकूलैश्वनानाधातुविचित्रितैः ॥ हरिन्मणिकृताशेषवेदिकाशतराजितैः ॥ ५१ ॥ महामरकतव्रातरचितस्तंभपंक्तिभिः ॥ पद्मरागशताकीर्णैःसरोभिर्विमलर्द्धिभिः ॥ ५२ ॥ येषुकीरगणाःशश्वत्पतंतिदाडिमभ्रमात् ॥ वीक्ष्यस्फटिककुंडेषुमहामारकतान्मणीन् ॥ ५३ ॥ बिडालनयनभ्रांत्यानसंत्याखुशुकादयः ॥ नैकशृंगाटकैःशुभ्रैःशिखरैर्हैमकुंभकैः ॥ ५४ ॥ महोपवनसंसिक्तद्विजराजविराजितैः ॥ वापीभिःकृतसोपानराजिराजितभूमिभूः ॥ ५५ ॥ कुमुदैःशतपत्रैश्वकह्लारकमलांबुजैः ॥ कोमलैरुत्पलैश्वेतैःकल्हारेंदीवरैरपि ॥ ५६ ॥ राजताभिर्नदीभिश्वस्वनैःसत्तमपक्षिणाम् ॥ हंससारसचक्राह्वक्रौंचैश्वजलकुक्कुटैः ॥ ५७ ॥ मदोन्मत्तैःसललनैर्मोदिताभिर्मनोरमैः ॥ नैकपुष्पभरानम्रशिखरैःशाखिभिर्वृतैः ॥ ५८ ॥ प्रमदाभिर्वृतैर्वीरकोटियूथपभूषितैः ॥ सुरनारीतिरस्कारविभ्रमाभिरहर्निशम् ॥ ५९ ॥ ईदृग्विधैःसौधवरैःशोभितैःशतकोटिभिः ॥ सरोजनयनायत्रकुचभारावनामिताः ॥ ६० ॥ क्षाममध्याःपृथुश्रोण्यश्वलत्कुंडलरोचिषः ॥ चलंत्यःशोभयंतिस्मतांपुरीमलकामिव ॥ ६१ ॥ सुप्रोक्षितविलासिन्योमानिन्योमदिरेक्षणाः ॥ सुरनारीतिरस्कारलावण्याविलसंतिया ॥ ६२ ॥ मुखंचंद्राकारंनयनयुगलंखंजननिभंस्फुरद्बिंबाभोष्ठंभुजगपतितुल्योऽलकचयः ॥कुचौपीनौकान्तौकरिकलभकुंभाभकठिनौनजानेरामेयंकथमिहविधात्राविरचिता ॥ ६३ ॥ सौनासीरामिवस्फीतांश्रियंभुंजन्महामनाः ॥ महेंद्रभुवनस्पर्द्धिसद्गेहस्थोमुमोदह ॥ ६४ ॥ स्पृहणीयगुणःशूरःसुराणामपिभूरिदः ॥ महाभक्तिगुणयुतःसदाविष्णुपदार्चकः ॥ ६५ ॥

शशासभूमंडलमुग्रतेजाःप्रपन्नराजन्यशरण्यमूर्तिः ॥ विराजयन्देशममानभावःस्वर्गेबिडौजाइवभूतलेऽस्मिन् ॥ ६६ ॥ यदीयपादद्वयमिंद्रसूनोस्तीर्थो
निनान्यत्रचचालविद्वन् ॥ जगादजिह्वाजगदीशनामाकरोज्जगन्नाथपदाब्जपूजाम् ॥ ६७ ॥ ननामनारायणदासवर्यमृतेकदाचिन्नशिरस्तदीयम् ॥
शुश्रावसीतापतिचित्रगाथांव्यालोकितोनेत्रयुगेनविष्णुः ॥ ६८ ॥ किंवर्ण्यतेवीरवरस्यशीलंकिंवर्ण्यतेतद्भजनंमुरारेः ॥ यदीयसौंदर्यविचारकालेसेंद्रा
सुराश्चित्रगताइवासन् ॥ ६९ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येदृढधन्वोपाख्यानेराजधानीवर्णनोनामनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥
सूतउवाच ॥ द्विजराजःसराजावैराजमंडलमंडनः ॥ रेजेसपत्नवर्गेषुसूर्यवत्कुलनंदनः ॥ १ ॥ तंसिषेवेतिसुभगाराज्ञीराजीवलोचना ॥ सर्वसौं
दर्यसंयुक्तानाम्नायागुणसुंदरी ॥ २ ॥ पतिव्रतामहाभागानित्यंभर्तृहितेरता ॥ यस्यागुणसमानत्वेभुविनास्त्यन्यसुंदरी ॥ ३ ॥ नारीगुणगणः
सर्वोयामाश्रित्यविराजते ॥ तरुणीरूपसंपन्नामानिनीमदिरेक्षणा ॥ ४ ॥ महाभाग्यवतीसाचदयायुक्तातपस्विनी ॥ प्रणयावनतानित्यंसौंदर्यमदव
र्जिता ॥ ५ ॥ सुधाधारप्रतिस्पर्द्धिलोललोचनराजिता ॥ विलोक्ययन्मुखंयातित्रपयेवशनैःशशी ॥ ६ ॥ लसत्खंजनसन्मानहरितंनयनद्वयम् ॥
तत्सौंदर्याशयेनैवकुरंगाःकाननौकसः ॥ ७ ॥ सौवर्णसंपुटस्पर्द्धिकपोलयुगमोहिनी ॥ लसद्बिंबाधरभ्रांतमधुव्रतवरूथिनी ॥ ८ ॥ किंचिच्चिकुरसंवी
तकर्णताटंकशालिनी ॥ बिभ्रतीवशशियुग्मंराहुग्रस्तार्द्धमंडलम् ॥ ९ ॥ नासिकालज्जितशुकालसच्चिबुकशोभिनी ॥ नतुतन्मुखसौंदर्योपमानं
विद्यतेक्वचित् ॥ १० ॥ लसद्ग्रैवेयसौंदर्यग्रीवाजनमनोहरा ॥ अत्यंतकर्कशोत्तुंगवृत्तपीनघनस्तनी ॥ ११ ॥ स्मराभिषेककलशौसौवर्णाविवबिभ्रती ॥
शुद्धजांबूनदोद्भूतमालयापरिवेष्टितौ ॥ १२ ॥ भारितोन्नयनयुग्ममध्यतोमध्यगाश्चिकुरनीलकलापः ॥ किंसुधाघटरिरक्षयाधृतोभोगिराजइवदुश्च्यवनेन
॥ १३ ॥ यद्भ्राजतेतुंगसरोजयुग्ममापीनमुद्यत्कलधौतकांति ॥ मन्येधृतंतुंगयुतंमृगाक्ष्यालावण्यवारांनिधिलंघनाय ॥ १४ ॥ करिकुंभलसद्यु
ग्मकुचकुंभोपरिस्थिता ॥ मुक्तालतातथाभातिस्वर्णकुंभेमरापगा ॥ १५ ॥ रोमराजिलसद्रज्जुःकुचकुंभौमनोरमौ ॥ अभ्यर्णनाभिसत्कूपतृ
षिताःकिंसुकामिनः ॥ १६ ॥ वक्षोजभूधरत्रासान्नाभिह्रदगतंकिमु ॥ मध्यंनलक्ष्यतेतस्याःकृशोदर्याःपलायितम् ॥ १७ ॥ त्रिवलीदलसौवर्ण
सोपानानिमृगीदृशः ॥ लावण्योच्चयमारोढुमिवपंचेषुभूपतेः ॥ १८ ॥ गजराजलसच्छुंडादंडशोभिविलोमशम् ॥ तदूरुयुगलंभातिशृंगाराधारभासु
रम् ॥१९॥ नितंबचक्रमेणाक्ष्याःप्रतिरूपविवर्जितम् ॥ लावण्याख्यकुलालेनरचितमतिसुंदरम् ॥ २० ॥ तस्याःसुजातचरणावुपमानाविवर्जितौ ॥ सुष्णं
तौयावकरसमुद्रिरंताविवस्फुटम् ॥ २१ ॥ सेयंस्वरूपचारित्रशोभिनीगुणसुंदरी ॥ तमुपास्तेमहाराजंरोहिणीवनिशाकरम् ॥ २२ ॥ स्वरुचारोचिता

वालास्तंभयंतीमरुद्गणान् ॥ मेखलाकटिशोभाढ्यारणत्कंकणनूपुरा ॥२३॥ सर्वसुंदरसद्गात्रासर्वाभरणभूषिता ॥ पतिव्रतधरासाध्वीराज्ञश्छंदानुव
र्त्तिनी ॥ २४ ॥ विष्णुबुद्ध्यामहाराजमाराधयतिभामिनी ॥ किंवर्ण्यंतेमहाभाग्यंभूपतेर्दृढधन्वनः ॥ २५ ॥ वामांगेयस्यसंयुक्तालसच्चामरधारिणी ॥
सेवतेमेदिनीनाथंछायेवगुणसुंदरी ॥ २६ ॥ नित्यंसुरासुरायस्याःसौष्ठवालोककांक्षिणः ॥ शृणुष्वान्यद्द्विजेशानभाग्यंराज्ञःकलानिधेः ॥ २७ ॥ चत्वा
रस्तनयास्तस्यनिदेशाकांक्षिणःसदा ॥ चातुर्यनिधयःशूरावेदवेदांगपारगाः ॥ २८ ॥ धार्मिकाःसत्यसंधाश्चधनुर्विद्याकृतश्रमाः ॥ पंचकर्मसुनिर्विण्णा
विक्रांताःसिंहयोधिनः ॥ २९ ॥ समुद्राइवदुष्पाराःप्रतापतापितारयः ॥ ब्राह्मणार्थेपराक्रांताःपितृभक्तिपरायणाः ॥ ३० ॥ सर्वसद्गुणवार्योघसंपूर्णाःसाग
राइव ॥ आदित्यमिवचोद्यंतमुपासंतःपितुर्मुखम् ॥३१॥ संत्यक्तसर्वकार्यार्थाःपितृभक्त्यामहारथाः ॥ सर्वदिग्जयिनोधीरानैकभूपतिवंदिताः ॥ ३२ ॥
स्वाचारनिरतानित्यंकृतरंजितसाधवः ॥ यन्नामश्रुतिमात्रेणरिपुनारीगणाःक्षणात् ॥ ३३ ॥ स्खलद्गर्भाहतोत्साहालसत्कटितटाःपुनः ॥ कांदिशीकाः
कुतोयामःकुत्रयामेतिजल्पकाः ॥ ३४ ॥ एवंविधामहात्मानःसाधवःशंसितव्रताः ॥ चत्वारस्तनयाराज्ञोराजानममितौजसम् ॥ ३५ ॥ उपाचरंति
नियतंकिंकराइवभूपतिम् ॥ नृपाज्ञापरतंत्रास्तेसूत्रबद्धाःशुकाइव ॥ ३६ ॥ नित्यंबलिहराराज्ञोनसिप्रोतावृषाइव ॥ नतथानेकभोगेननंदिनोनृपनंदनाः
॥ ३७ ॥ जनिकर्तृनिदेशेनयथासानंदविग्रहाः ॥ सत्पुत्रैरावृतःश्रीमान्नेजेभूपशिखामणिः ॥ ३८ ॥ सुरेंद्रवारणोदन्तैश्चतुर्भिःस्वोद्भवैरिव ॥ ईश्वरोभग
वान्यद्वन्महदाद्यैर्विभूतिभिः ॥ ३९ ॥ शुभैःशुभैर्गिरिवरोविरिंचिर्निगमैरपि ॥ अ ष्टौवैद्रव्यकोशाश्चसदाभाग्यप्रपूरिताः ॥ ४० ॥ भृत्याःपवित्राःसुभृ
ताभर्तृप्रियहितेरताः ॥ प्राणैरप्युपकुर्वंतिसाधूनांवांछितानिच ॥ ४१ ॥ दासान्सुदानाःसततंगुणोपकृतिरंजिताः ॥ दास्यःषोडशवार्षिक्योनिष्ककंठ्यो
विभूषिताः ॥ ४२ ॥ श्यामामंथरगामिन्यःपीनोन्नतपयोधराः ॥ हावभावकटाक्षैश्चमोहयंतिजगत्त्रयम् ॥ ४३ ॥ नित्यमेवमुपासंतेशतशोथसहस्रशः ॥
विंशद्योजनपर्यंतंप्राकारःपरितःसदा॥४४॥बद्धास्तिष्ठंतिमातंगानित्यमत्ताःप्रहारिणः॥सर्वैरिपुविभेत्तारोमहाबलपराक्रमाः ॥ ४५ ॥ हयाःशुकनिभाश्चैव
सिंधुदेशसमुद्भवाः ॥ चपलाश्चपलानेकशिक्षागतिविशारदाः॥४६॥ केचित्तित्तिरवर्णाश्चशुकनासानिभाःपरे॥हंसवर्णाःपवनगाःखेचराइवपक्षिणः ॥ ४७॥
पर्वतोल्लंघिनःसर्वउच्चैःश्रवकुलोद्भवाः ॥ राजद्वारगतानित्यंराजंतेवाजिराजयः ॥ ४८ ॥ रथाःकांचनचित्रांगास्सदश्वपरियोजिताः ॥ सुध्वजाःसुपता
काश्चसुचक्रवरकूबराः ॥ ४९ ॥ सुवरूथाःसुनीडाश्चस्वास्तीर्णाःसाध्वलंकृताः ॥ विमानसदृशाःसर्वैसर्वैप्राणिमनोहराः ॥ ५० ॥ अनेकभटशौंडीरैः
संश्रितागुणिभिर्नरैः ॥ स्वर्गेलोकेचपातालेदैत्यदानवसंसदि ॥ ५१ ॥ सनास्तिविभवोलोकेयोनात्राविद्यतेजने ॥ ५२ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तम
माहात्म्येसुधन्वोपाख्यानेसमृद्धिवर्णनोनामदशमोऽध्यायः ॥१०॥ ऋषिरुवाच ॥ यस्मिन्संसक्तहृदयोदृढधन्वामहीपतिः ॥ नबुध्यतेसुखासक्तःसंवत्स

रगणान्बहून् ॥ १ ॥ संवत्सराणांनियुतत्रयंराज्यमपालयत् ॥ कदाचिच्छयनारूढअश्वानांह्रेषितंश्रुतम् ॥ २ ॥ बृंहितंगजवृंदस्यसुभटानामहंकृ
तिम् ॥ स्नेहयुक्तानिरम्याणिवचांसिभृत्यवर्गतः ॥ ३ ॥ दासदासीगणेशानांश्रुत्वावाचःसुपेशलाः॥आत्मभक्तिगुणोदर्काःप्रियाश्चंद्रांशुशीतलाः ॥४॥
निरीक्ष्यवसुपीठंस्वंस्वीयाज्ञापरिपालकम् ॥ पुत्राःपौत्राःपवित्राश्चभक्तियुक्तामनोहराः ॥५ ॥ निर्दोषाश्चप्रभालक्ष्मीर्नीरुजंस्वंकलेवरम् ॥ यन्नामत्रिदिवं
यातमालोकालोकविश्रुतम्॥६॥ समृद्धिरतुलादिव्याकामिन्यश्चमनोहराः ॥ पृथिवीसर्वशोभाढ्यालोका धर्मपरायणाः ॥ ७ ॥ नगरीसुरभोग्येवजना
निर्जरसुंदराः ॥ अनेकसौख्यसलिलेपरिपूरितवारिधौ ॥ ८ ॥ नलेभेचिंतयन्वीरोदुःखपंकमनागपि ॥ तदासंचिंतयामासकेनपुण्येनलब्धवान् ॥ ९ ॥
अतुलंनिर्मलंसौख्यंस्वर्गिणामपिदुर्लभम् ॥ नपश्यामितपस्तप्तंनदत्तंनहुतंक्वचित् ॥ १० ॥ नाराधितोऽस्तिमेदेवःकेनाहंप्राप्तवानिदम् ॥ किमिदंप
रिपृच्छामिस्वीयमैश्वर्यकारणम् ॥ ११ ॥ अतःपरंतुकिंभाविघोरसंसारसागरे ॥ नतादृशंमुनिंपश्येसंदेहंयःपराणुदेत् ॥ १२ ॥ एवंसंचिंतयन्राजाया
मिन्यंतमवाप्तवान् ॥ उषस्युत्थायसहसासमंदुंदुभिनिःस्वनैः ॥ १३ ॥ वैतालिकमुखोद्गीतस्तुतिवाक्यैर्मनोरमैः ॥ आवश्यकंविधायाशुस्नात्वागंगो
दकेनतु ॥ १४ ॥उपस्थायार्कमुद्यंतंसुरान्संपूज्ययत्नतः ॥ ततःशृंगारभवनमागत्यपरिधत्तवान् ॥ १५ ॥ शृंगारान्वसनंसर्वंस्वस्तिवाच्यद्विजातिभिः ॥
पुरोधायनमस्कृत्यवाजिनंसिंधुजंशुभम् ॥ १६ ॥ आरुह्यगिरिकूटेषुमृगयांगंतुमुद्यतः ॥ साकंसचिवमुख्यैश्चयोधमुख्यैःपदातिभिः ॥ १७ ॥ श्वजी
विभिर्वागुरिकैरणग्राहभटैरपि ॥ बहुशूरावृतःश्रीमांश्चचारगहनंवनम् ॥ १८ ॥ नीलमेघसमंहृद्यंविचित्रद्विजराजितम् ॥ ईहामृगगणाकीर्णंबहुपादपशो
भितम् ॥ १९ ॥ पक्षिभिःक्वचिदाकीर्णंक्वचिच्चैवातिसुंदरम् ॥ झिल्लिकोलूकशब्दैश्चक्वचिच्चातिभयानकम् ॥ २० ॥ फेरूणांचैवशब्देनद्वीपिशब्दैर्वृ
तंक्वचित्॥क्वचिन्मत्तमयूरोग्रशब्देनैवविराजितम् ॥२१॥ कर्बुरंशितिकंठैश्चआनीलंशुकपोतकैः ॥ श्यामितंषट्पदध्वांक्षभाससारिककोकिलैः ॥ २२ ॥
हंससारसचक्राह्वकोटकुलसूचितम् ॥ पारावतशकुंतौघैर्व्याप्तंनानाविहंगमैः ॥ २३ ॥ शालतालतमालैश्चप्रियालपनसार्जुनैः ॥ हिंतालकोविदाराम्रम
धूककुटजाशनैः ॥ २४ ॥ रसालाशोकबदररंभातिलककिंशुकैः ॥ केसराम्रातभल्लातैःपाटलाक्रोटघोटकैः ॥ २५ ॥ सिंदूरैरंडबकुलप्लक्षन्यग्रोधचं
पकैः ॥ धवाश्वत्थोग्रखदिरबिल्वामलकतिंदुलैः॥२६॥कर्पूरागरुखर्जूरकेतकीदाडिमेंगुदैः ॥ सुरदारुकपित्थाक्षपत्रजीवकसेचकैः ॥२७ ॥ जंबुजंबीरना
रिंगशेलुश्रीपर्णचंदनैः ॥ एभिश्चान्यैर्द्रुमव्रातैर्वनंतत्सर्वतःशुभम् ॥ २८ ॥ विवेशमृगयाशीलःकामीववनितात्रजम् ॥ चचारमृगयाशूरोनिघ्नन्मृगगणा

न्बहून्॥२९॥मृगानृक्षान्वराहांश्चखड्गांश्चशशशल्लकान् ॥ द्वीपिनोद्विरदांश्चित्रांश्चमरान्सृमरान्बलान्॥३०॥गवयान्सिंहगोपुच्छाञ्छार्दूलान्माहिषान्रुरून्॥
एवंविधाननेकांश्चसर्वान्वनचरान्बहून् ॥ ३१ ॥ जघानसमहाबाहुःशरैर्नानाविधैर्वने ॥ अभ्याशवर्तिनःखड्गैःशरैश्चशरगोचरान् ॥ ३२ ॥ भल्लैश्चपट्टिशैः
प्रासैर्भिंदिपालैश्चमुद्गरैः ॥ ऊडैर्दंडैःशतघ्नीभिर्गदामुसललांगुलैः ॥ ३३ ॥ तोमरैःसृणिभिःपाशैःशूलचक्रपरश्वधैः ॥ भुशुंडीभिर्गदाभिश्चनिस्त्रिंशैः
परिघैःपलैः ॥ ३४ ॥ शूकराणांवधेनापिलोडयामासतद्वनम् ॥ रुद्राक्रीडसमंघोरंकृतंतेनमहात्मना ॥ ३५ ॥ कदाचित्तेनबाणेनमहाबलयुतेनच ॥ क
श्चिन्मृगोहतोरण्येबाणेनदृढधन्वना ॥ ३६ ॥ समृगोंतर्हितोजातोबाणमादायसत्वरम् ॥ तंजगामतुराजेंद्रःशर्वःक्रतुमृगंयथा ॥ ३७ ॥ मृगःकुत्रापिसंली
नोभ्रमन्नेवापतन्नृपः ॥ क्षुत्तृड्दुःखपरीतात्माबभ्रामवनसंकटे ॥ ३८ ॥ कामिनीनयनाविद्धोयथाविष्णुपराङ्मुखः ॥ आससादचिराद्वीरःकासारंसागरो
पमम् ॥ ३९ ॥ कूजद्धंसकुलप्रेष्ठंचक्रवाकरवेणच ॥ सारसारावसरसंकारंडवनिषेवितम् ॥४०॥ जलकुक्कुटदात्यूहकुररबिककूजितम् ॥ स्वच्छपानी
यसंपूर्णंयथासज्जनमानसम् ॥ ४१ ॥ अंतर्ग्राहगणक्रूरंखलानांहृदयंयथा ॥ स्फुरन्मत्स्यचलत्पद्मरेणुरंजितसत्पयः ॥ ४२ ॥ लसत्पंकजनिर्व्यूहैःपरितः
परिवेष्टितम् ॥ स्वच्छमत्स्यंयथाचंद्रमंडलंतारकावृतम् ॥४३॥ तत्सरःसलिलंपुण्यंसर्वाजीव्यंवगाहतः ॥ यथाप्रपंचसंतप्तोविष्णुभक्तिंविगाहते॥४४॥
सर्वाजीव्यंवारिवीरोययौपातुंचभक्तितः ॥ नीरंपीत्वाततस्तीरआगत्यमनुजाधिपः ॥ ४५ ॥ अपश्यच्चवटंवीरःकेतुभूतंवनांतरे ॥ सर्वत्रसंवृतंपत्रैर्घ
नच्छायंमनोहरम् ॥ ४६ ॥ दृष्ट्वाव्यचिंतयद्वीरःक्षोणीमंडलमंडनः ॥ न्यग्रोधोयंबहुच्छायःसर्वसत्वसुखप्रदः ॥ ४७ ॥ पत्रैःफलैर्जटाभिश्चदारुनिर्या
सवल्कलैः ॥ क्षणमेनमुपाश्रित्यभविष्यामिह्यहंसुखी ॥ ४८ ॥ हरिधर्मोयथासाधुर्वोरसंसारपीडिनाम् ॥ इतिनिश्चित्यमनसाहयादुत्तीर्यभूमिपः॥ ४९ ॥
निषसादधरोपस्थेचैलास्तीर्णेसुशाद्वले॥चर्मोपधानमादायसुष्वापधरणीतले॥५०॥जटासुवाजिनंबद्ध्वासर्वतोऽलोकयद्वटम्॥ निरीक्षमाणेनृपतौवटशाखाः
सहस्रशः ॥ ५१ ॥ पंचयोजनविस्तीर्णाःसप्तयोजनमुद्गताः ॥ तत्रागमत्खगःकश्चित्कीरःपरमशोभनः ॥ ५२ ॥ सत्प्रवाललसच्चंचुःकृष्णग्रीवोहरिच्छदी॥
अंत्यतविलसन्नेत्रःसुपादःशोभनोदरः ॥ ५३ ॥ मानुषीमीरयन्वाणीमतुलांनृपमोदिनीम् ॥ यदाकर्णनमात्रेणदुःखंसद्यःप्रशाम्यति॥५४॥पीयूषक्षरणंपी
त्वाहृष्टरोमानृपोऽभवत् ॥ उत्थायशयनात्तूर्णंयंत्रोत्क्षिप्तइवस्वयम् ॥५५ ॥ शुश्रावशुकसद्वक्त्राद्वाणीमादरतोनृपः॥शुकःस्ववक्त्रात्सुश्लोकंपपाठसौपुनः
पुनः ॥५६॥ विद्यमानातुलंसौख्यमालोक्यातीतमात्मनः॥नचिंतयतिसंमूढःसकथंपारमेष्यति॥५७॥वारंवारमिदंपद्यंपपाठनृपतेःपुरः ॥ बोधयन्निवसंमूढं
वाचापीयूषकल्पया॥५८॥वटशाखामलंकृत्यमुहूर्तमीरयन्निदम्॥ शुकःशुक्रसमोराज्ञोऽनिच्छतःखमुपारुहत् ॥५९॥ श्रुत्वातस्यवचःश्रीमान्मुमुदेमुमुहेऽ

पिच ॥ किमेतदुक्तवान्धीरः शुकः पद्यंपुनःपुनः ॥६०॥ समुपालब्धवान्किंवामद्वाग्यंसुमनोहरम् ॥ किंवाचायंभवेत्कृष्णद्वैपायनसुतोऽपरः ॥६१॥ अथवादे
वकीपुत्रःकिंवाकश्यपनंदनः ॥ स्वमथानुचरंज्ञात्वाममदृष्टिपथंगतः ॥ ६२ ॥ ममानुग्रहकर्त्ताचवासुदेवोभविष्यति ॥ इतिचिंतापरेराज्ञिसासेनासमुपा
गता ॥६३॥ आजानेयखुरक्षुण्णमेदिनीलोकनींचिरात् ॥ वाजिवारणपादातरथवृंदलसद्धटा ॥ ६४ ॥ तामाप्यदृढधन्वासौनातिहृष्टमनाययौ ॥ पुरंतुस
चिवैःसाकंनयनापांगलक्षितः ॥६५॥ नृपोप्यचिंतयच्चित्तेकोमेशोकंपराणुदेत् ॥ इतिचिंतापरोराजानलेभेशर्मकुत्रचित् ॥ ६६ ॥ नशासतेनवैभुंक्तेनहृष्य
तिनकुप्यति ॥ ध्यानमेवाश्रितःश्रीमान्योगीवानंदसंप्लवे ॥ ६७ ॥ वाच्यमानोनचब्रूतेहास्यमानोननंदति ॥ परिरंभतिनोपुत्रान्नभार्यामभिनंदति
॥ ६८ ॥ नचतच्चित्तगांचिंतांकोपिवेदनृपेरतः ॥ कदाचिदासाद्यपतिंसाध्वीसागुणसुंदरी ॥ ६९ ॥ रहःप्रोवाचराजानंपौलस्त्येवमरुत्पतिम् ॥ गुणसुंदर्यु
वाच ॥ भोभोनृपतिशार्दूलशत्रुसेनाभयावह ॥ ७० ॥ महाराजनरेशानसर्वसाधुजनप्रिय ॥ किमेनमाधिंदुर्धर्षंहृदिधारयसेविभो ॥ ७१ ॥
नाहंजानामिवीरेशसज्जनानन्दवर्द्धन ॥ त्वदाधिमूलंभूपालत्रैलोक्येपिकुतोयथा ॥ ७२ ॥ नागायक्षपिशाचाश्चसुपर्णोरगचारणाः ॥ गंधर्वानररक्षांसिसुरा
सुरमृगाःखगाः ॥ ७३ ॥ सद्गुणग्रामपीयूषपयोधिप्लाविताःसदा ॥ त्वत्प्रसादसुधासिंधुमाकांक्षंतिनिरंतरम् ॥ ७४ ॥ सभवान्कथमत्युग्रंचिंताज्वलन
मुद्धतम् ॥ हृदिधारयतेसाधोनैतत्त्वय्युपपद्यते ॥ ७५ ॥ यदिकिंचिन्मयावीरभवांतःप्रकृतंभवेत् ॥ तनूजैःसचिवैर्वापिक्षमस्वत्वंमहीपते ॥ ७६ ॥
मातुर्जठरजोबालःपदाघातंसुदुर्धरम् ॥ करोत्यपिममाधारकिमितिविक्रियांभजेत् ॥ ७७ ॥ ततःक्षमस्वभूपालअपराधशतानिचेत् ॥ शरच्छीतांशुसं
दोहशोभनंवदनंतव ॥ ७८ ॥ कथंनराजतेभूपहेमंतेकमलंयथा ॥ प्रसन्ननयनापांगालोकनानंदनिर्वृता ॥ ७९ ॥ साहंकथंनिरानंदेत्वयिस्यांहृदयेश्वर ॥
आपीयकर्णरस्यानिमहिलावचनान्यपि ॥ ८० ॥ तथैवास्तेसभूपालोनकिंचिदभिजल्पसे ॥ स्मरञ्छुकवचस्तप्यन्दुर्विज्ञेयंसुरासुरैः ॥ ८१ ॥
नकिंचनोवाचप्रियांपातिव्रत्यपरायणाम् ॥ सापिवाग्मिनीनिःश्वस्यभर्तृदुःखातिपीडिता ॥ ८२ ॥ नबुबोधधरानाथचिंताकारणमद्भुतम् ॥
एवमेवकियान्कालःप्रवव्राजमहीपतेः ॥ ८३ ॥ संदेहसागरोत्तारहेतुंचिंतयतश्चिरम् ॥ ८४ ॥ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येदृढधन्वो
पाख्यानेशुकवाक्यंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ सूतउवाच ॥ कदाचिच्चिंतयानस्यराज्ञःशोकातुरस्यच ॥ आजगामप्र
सन्नात्मावाल्मीकिर्भगवान्विभुः ॥ १ ॥ योरामचरितंदिव्यंचकारपरमाद्भुतम् ॥ यस्यश्रवणमात्रेणब्रह्महापिविमुच्यते ॥ २ ॥ नृपतिस्तमथालोक्यमित्राव
रुणनंदनम् ॥ अतिसंहृष्टवदनःस्वात्मानंबह्वमन्यत ॥ ३ ॥ अभ्यर्णवर्त्तनांनारीमुवाचगुणसुंदरीम् ॥ बालेममाद्यदुःखानामंतःप्राप्तोहरीच्छया ॥ ४ ॥

नायंवाल्मीकिरायातिकिंतुसाक्षाद्धरिःस्वयम् ॥ सर्वभूतदयायुक्ताःसाधवोदीनवत्सलाः ॥ ५ ॥ अयंसाक्षान्महाभागःश्रीरामदयितोमुनिः ॥ नाने
नसदृशोलोकेद्विजातिर्विद्यतेशुभे ॥ ६ ॥ कृत्वारामायणंयेनपावितंजगतांत्रयम् ॥ सोयमायातिवामोरुकिंमेभाग्यमतःपरम् ॥ ७ ॥ सूतउवाच ॥
एवंरटन्महीपालःप्रत्युद्गम्यमुनीश्वरम् ॥ पपातचरणोपांतेक्षोणीमंडलमीश्वरः ॥ ८ ॥ तमासाद्यमुनिंप्रेम्णावाल्मीकिंजगतांगुरुम् ॥ आनंदेनयुतो
राजाददौवैपरमासनम् ॥ ९ ॥ मधुपर्कविधानेनसंपूज्यमुनिपुंगवम् ॥ धेनुंनिवेद्यातिथयेविश्राम्यमुनिभूषणम् ॥ १० ॥ पादावंकगतौकृत्वाकराभ्यां
प्रामृजन्नृपः ॥ पादावनेजनीरापःशिरसातिमुदावहन् ॥ ११ ॥ उवाचस्निग्धयावाचास्मरञ्छुकवचोहृदि ॥ हार्दंचितांतमाकांक्षन्मानयन्मुनिपुंगवम्
॥ १२ ॥ राजोवाच ॥ ॥ भगवन्कृतकृत्योऽहंसभाग्योऽस्मिद्विजेश्वर ॥ अद्यमेसफलंजन्मअद्यमेसफलाःक्रियाः ॥ १३ ॥ अद्यमेसफलंज्ञानं
विभोत्वत्पाददर्शनात् ॥ १४ ॥ कृतार्थोहंकृतार्थोहंकृतार्थोहंद्विजेश्वर ॥ श्रुतंमेसफलंजातंयद्भवानक्षिगोचरः ॥ १५ ॥ विमृशन्नानुपश्यामिकेनपुण्ये
ननोभवान् ॥ त्रैलोक्यतापसंहारोयन्नेत्रविषयीकृतः ॥ १६ ॥ अद्यमेपितरस्तृप्ताःसेंद्रालोकेप्रतिष्ठिताः ॥ स्थूलसूक्ष्मात्मकोदेवोविष्णुस्तुष्टोमहेश्वरः
॥ १७ ॥ किमुवर्ण्यंमहद्भाग्यंजगत्पावनपावन ॥ दृश्यतेमत्सभासंस्थोवाल्मीकिःसुरदुर्लभः ॥ १८ ॥ आहोस्वप्नःकिमुमायाअथवामनसोभ्रमः ॥
अलभ्यमपिलोकेशैःपश्याम्यद्यसमक्षतः ॥ १९ ॥ त्वत्समागमतोब्रह्मन्किमलभ्यंममाधुना ॥ यत्त्वयाजगतांनाथस्त्रैलोक्यपावनोहरिः ॥ २० ॥
तथानिरूपितोरामोयथानान्येनकेनचित् ॥ पिबतस्त्वन्मुखांभोजाच्च्युतंहरिकथामृतम् ॥ २१ ॥ मुच्यंतेभवपाशेभ्यःसुखेनैवाजिताजनाः ॥
॥ सूतउवाच ॥ ॥ विरराममुनिंनत्वास्तुत्वानृपतिनंदनः ॥ सपुत्रःस्वजनामात्यःसपत्नीकःसबांधवः ॥ २२ ॥ वाल्मिकिरथतंदृष्ट्वाराजानंविस्मया
न्वितम् ॥ उवाचपरमप्रीतःपीत्वातद्वचनामृतम् ॥ २३ ॥ वाल्मीकिरुवाच ॥ साधुसाधुनृपश्रेष्ठत्वय्येवउपपद्यते ॥ रामभक्तसदाराजन्परोपकृतयेनराः
॥ २४ ॥ धन्योस्मिनृपशार्दूलवदयत्तेमनोगतम् ॥ अदेयमपिदास्यामिनादेयंविद्यतेतव ॥ २५ ॥ त्वद्विधागुणिनोराजन्वराहानितरेनृप ॥ किंचिद्वक्तुं
स्पृहातेऽस्तिज्ञातमद्येंगितैस्तव ॥ २६ ॥ राजोवाच ॥ ॥ त्वत्प्रसादान्मुनेकिंचिन्न्यूनंनास्तिममाधुना ॥ यदहंवसुधापीठेकामयेत्सुखकारणम् ॥ २७ ॥
तत्त्वदीयपदांभोजकृपयाचास्तिमेऽखिलम् ॥ परंतुहृदयेविद्वन्संदेहोविद्यतेमम ॥ २८ ॥ तस्यपारप्रदस्त्वत्तोनान्यस्त्रिभुवनेष्वपि ॥ तत्पराणुदमे
ब्रह्मन्मनःशल्यंचिरार्पितम् ॥ २९ ॥ सत्वरंवदराजेंद्रेत्युक्तेभूपोप्युवाचह ॥ राजोवाच ॥ ब्रह्मन्राज्यंकरोम्यद्यकथंनान्यःकरिष्यति ॥ ३० ॥ सुखानाम
पिनोपारंपश्यामिप्रविलोकयन् ॥ पुत्राःपत्न्यःप्रजाभृत्याबांधवाःस्वजनाःमम ॥ ३१ ॥ हयानागारथाधान्यंधनंकोशोबलंसुहृत् ॥ मित्राणिमेदिनी

सर्वांशरीरंचासनानिच ॥ ३२ ॥ सर्वमेतच्छ्रुतंतेस्तियथानान्यत्रविद्यते ॥ नापेक्ष्यंमानुषेलोकेत्रिदिवेपिमुनीश्वर ॥ ३३ ॥ केनपुण्यप्रभावेनलब्धम
श्वर्यमद्भुतम् ॥ स्पृहणीयंसुरेशाद्यैरपिकिंमानवैर्मुने ॥ ३४ ॥ काशीकोशलकर्णाटकांबोजकुरुकैकयान् ॥ मत्स्यमागधगांधारगौडसैंद्रेन्द्रसैन्धवान् ॥३५॥
कालिंगवंगपांड्यांश्चानंगकैकटकेरलान् ॥ दशार्णनीचचैलेयाह्लाँटकामरुधीवरान् ॥३६॥ काश्मीरमरुपांचालमरुमालवकैकयान् ॥ सौराष्ट्रजांगलानर्त्त
हूणहैहयजानकान् ॥३७॥ त्रिगर्तहयपांचालपाटच्चरकुटच्चरान् ॥ पण्यपश्रीकलंबोष्ठदरदाभीरभैरवान् ॥ ३८ ॥ हयवर्तून्करीनासान्कर्णप्रावरणानपि ॥
अन्यानपिचदेशान्मेतन्नृपाश्चातियोधिनः ॥ ३९ ॥ लीलयाबलिमादायनत्वायांतिमहामुने ॥ प्रतापादेवराजन्याधान्यंयच्छंतिसत्त्वराः ॥ ४० ॥ कृतामे
तनयैर्वीरैवेश्याइवकरप्रदाः ॥ किमत्रकारणंब्रह्मंस्तपोदुःखिदयाथवा ॥ ४१ ॥ अन्यच्चहृदयाद्यन्मेह्यानिशंनापसर्प्पति ॥ शृणुतन्मेमुनिश्रेष्ठसंदेहं
मेपराणुद ॥ ४२ ॥ कदाचिन्मृगयाकामोगतोहंगहनंवनम् ॥ चरित्वासुचिरंप्राप्तोदुश्चरंगहनंवनम् ॥ ४३ ॥ भ्रमन्नपश्यंकासारंतत्रपीतंजलंमया ॥
श्रमापनोदमाकाक्षंस्तीरेन्यग्रोधमाश्रितः ॥ ४४ ॥ सुच्छायंसुंदरतरंमनोनयननंदनम् ॥ अपश्यंदर्शनीयांगंशुकमेकंमनोहरम् ॥ ४५ ॥ मधुराभाषि
णंविप्रहृष्ट्वामेहर्षितंमनः ॥ चेतोवृत्तिर्यतस्तस्मिन्यावन्ममपतात्रिणि ॥ तावन्मांसम्मुखोभूत्वाश्लोकमेकंपपाठह ॥ ४६ ॥ पुनःपुनस्तदेवासौ
पद्यंपठतिपक्षिराट् ॥ विद्यमानातुलंसौख्यमालोक्यातीतमात्मनः ॥ ४७ ॥ नचिंतयतिसमूढस्तत्कथंपारमेष्यति ॥ इतिवाचंशुकेनोक्तामाकर्ण्याहं
सुविस्मितः ॥ ४८ ॥समुत्थितस्ततःशीघ्रंकीरराङ्गगनंगतः ॥ नतज्जानाम्यहंब्रह्मन्किमुवाचहरिच्छदः ॥ ४९॥ कोसौशुकःकिमाहायंमह्यंवैभावयन्मुने॥
इमंमेहार्दसंदेहंभवानुच्छेत्तुमर्हति ॥ ५० ॥ इति श्रीपद्मपुराणेपुरुषोत्तममाहात्म्येदृढधन्वोपाख्यानेदृढधन्ववृत्तांतकथनंनामद्वादशोऽध्यायः ॥ १२ ॥
सूतउवाच ॥ श्रुत्वावाक्यानिभूपस्यवाल्मीकिर्मुनिसत्तमः ॥ प्राणायामपरोभूत्वामुहूर्त्तंध्यानमाश्रितः ॥ १ ॥ करामलकवद्विश्वंभूतंभव्यंभवच्चयत् ॥
व्यालोक्यसमुनिश्रेष्ठोध्यानस्तिमितमानसः ॥ २ ॥ ततोविहस्यभगवान्राजानंमुनिरूचिवान् ॥ विस्मितःशुभयावाचाशिरोधुन्वन्पुनःपुनः ॥ ३ ॥
वाल्मीकिरुवाच ॥ शृणुभूपतिशार्दूलप्राग्जन्मचरितंतव ॥ येनपुण्येनभगवांस्त्वय्यैश्वर्यंसमर्पयत् ॥ ४ ॥ पुराजन्मनिराजेंद्रभवान्द्रविडदेशजः ॥ द्विजः
कश्चित्सुदेवाख्यस्ताम्रपर्णीतटेवसन् ॥ ५ ॥ आश्वलायनसंभूतःसदाचारपरायणः ॥ धार्मिकःसत्यवादीचयथालाभेनतुष्टिमान् ॥ ६ ॥ स्वाध्या
यव्रतसंपन्नःसदाविष्णुपरोऽभवत् ॥ तस्यैवंवर्तमानस्यभार्यासीद्वरवर्णिनी ॥ ७ ॥ गौतमीतिसुविख्यातासद्वंशजननीशुभा ॥ पतिंपर्यचरत्प्रेम्णाशीतां ॥ १२ ॥
शुंरोहिणीयथा ॥ ८॥ तस्यैवंगृहमेधेचवर्त्तमानस्यधर्मतः ॥ व्यतीतःसुमहान्कालःप्रापनासौसुसंततिम् ॥ ९ ॥ एकदाससमासीनःसेव्यमानःस्वकांतया॥

जगादवचनंविप्रःशोकेनगद्गदाक्षरम् ॥ १० ॥ अयिसुंदरिसंसारेनास्तिसौख्यंसुतात्परम् ॥ तमप्राप्यवरंपुत्रंजीवितंममनिष्फलम् ॥ ११ ॥ नलभेयं
सदृक्षंचेत्सुतंमानिनिमानदम् ॥ सद्योमेमृतिरेवास्तुनहिपुण्यंप्रियंमम ॥ १२ ॥ अतिखेदसमाविष्टाप्रियंवीक्ष्यप्रियंवदा ॥ आश्वासयत्स्वभर्त्तारंवाक्यै
र्वाक्यविशारदा ॥ १३ ॥ गौतम्युवाच॥मैवंविधानिवाक्यानिब्रूहिवल्लभभूसुर ॥ भवद्विधाभागवतानैवंमुह्यंतिसूरयः ॥ १४ ॥ सत्यधर्मपरोऽसित्वंजितः
स्वर्गस्त्वयाविभो ॥ साधुचारित्रसाहस्रैःकिंतुपुत्रैःकरिष्यसि ॥ १५ ॥ यदिनारायणःपुत्रंनदास्यतिहरिप्रिया ॥ कथंपुत्रैःसुखावाप्तिर्भवित्रीतवसुव्रत ॥
॥ १६ ॥ चिंतनंरघुनाथस्यहरिपादार्चनंविभो ॥ सुखंदास्यंतिविप्रेंद्रनतुपुत्रःकथंचन ॥ १७ ॥ यदिपुत्रजसौख्येतुकामनास्तिदृढातव ॥ कथंनदे
वदेवेशमाराधयसिकेशवम् ॥ १८ ॥ यमाराध्यपुराब्रह्मन्कर्दमःसुखमाप्तवान् ॥ सर्वसौख्यनिधिंप्रार्थ्यपश्चाद्धरिपदंगतः ॥ १९ ॥ सेवस्वजगतांनाथं
हरिंसर्वेश्वरंविभुम् ॥ यत्कृपापांगलेशेनइहामुत्रचमोदते ॥ २० ॥ इतिवाक्यानिरामायाःश्रुत्वाविप्रशिखामणिः ॥ निश्चित्यैवंतयासार्द्धंताम्रपर्णीतटंगतः
॥ २१ ॥ चचारविजनेतस्मिंस्तपःपरमदुष्करम् ॥ चतुर्वत्सरसाहस्रंयेनदेवाश्चकंपिरे ॥ २२ ॥ सभाजयञ्जगन्नाथंहृषीकेशंजगद्गुरुम् ॥ विष्णुःसर्वे
श्वरोदेवश्चिरात्तुष्टःसमागमत् ॥ २३ ॥ दृष्ट्वातंकमलाकांतंसुपर्णोपरिशोभितम् ॥ तुष्टावपरयाभक्त्यासपत्नीकःप्रहर्षितः ॥ २४ ॥ सुदेवउवाच ॥
नमस्तेजगतांनाथत्रैलोक्याभयदप्रभो ॥ सर्वेश्वरनमस्तेतुत्वामहंशरणंगतः ॥ २५ ॥ पाहिमांपरमेशानशरणागतवत्सल ॥ जगद्वंद्यनमस्तेऽस्तुनमस्ते
पुरुषोत्तम ॥ २६ ॥ यथान्यसुरभक्तस्यक्लिश्यत्यज्ञानसंकटे ॥ ननतथाभवदीयायेतेनत्वंपुरुषोत्तमः ॥ २७ ॥ यथावितामहाराजदेवकीकंससं
कटात् ॥ तथैवरक्षमांस्वामिन्घोरदुष्पारसागरात् ॥ २८ ॥ यज्ञसेनसुतादुष्टदुर्योधनवशंगता ॥ लालप्यमानाऽविरतंत्वयैवपरिरक्षिता ॥ २९ ॥
दुष्टमागधभूपालसंरोधपरिकर्शिताः ॥ राजन्यारक्षिताविष्णोनमांकिमिहरक्षसि ॥ ३० ॥ दारुणाजगरग्रस्तानेकाहीरसुतान्विभो ॥ यस्त्वंरक्षितवान्कृ
ष्णसमांपाहिव्रजेश्वर ॥ ३१ ॥ बल्लव्योविरहाक्रांतदेहाःकाननविभ्रमाः ॥ मध्यतांदर्शयित्वातेह्यनल्पसुखपूरिताः ॥ ३२ ॥ पाहिमांजगदानंदगो
विंदशरणागतम् ॥ प्रपन्नभयहेत्येवंव्रतंतेऽस्तिगदाधर ॥ ३३ ॥ जतुगृहेप्रचंडाग्निज्वालाभिःपरिवेष्टिताः ॥ रक्षिताःपांडुतनयास्त्वयैवजगदीश्वर॥३४॥
दामोदरममाधारभक्तानामभयंकर ॥ क्षीरोदतनयाकांतसुपर्णांकितकेतन ॥ ३५ ॥ चतुर्विंशतितत्त्वौघजीवनायविवर्जिते ॥ वासवानुजविश्वेशंचक्रपाणे
नमोस्तुते ॥ ३६ ॥ नत्वांब्रह्मादयोदेवाःस्तोतुंशक्तारमेश्वर ॥ मनुष्योह्यल्पबुद्धिश्चकथंस्तोतुंक्षमोह्यहम् ॥ ३७ ॥इतिस्तुत्वाद्विजस्तस्थौखिन्नोवपुरतो
हरेः ॥ ततोविष्णुर्ब्राह्मणंतंदृष्ट्वाम्लानमुखंपुरः ॥ प्रोवाचस्निग्धयावाचातत्खेदंशमयन्निव ॥ ३८ ॥ श्रीविष्णुरुवाच ॥ साधुसाधुद्विजश्रेष्ठाकिमि

च्छसिवदस्वतत् ॥ यत्तेऽभिलषितंचित्तेदास्यामितवभूसुर ॥ ३९ ॥ सुदेवउवाच ॥ ॥ किमज्ञातंमहाराजकूटस्थाखिलचित्तग ॥ सर्वेंद्रियनियंता
सिसर्वसाक्षीजगत्पतिः ॥ ४०॥ यदिप्रीतोसिभगवन्मेतद्वक्ष्यामितेऽग्रतः ॥ अनाथनाथनाथोसि शृणुष्वत्वमधोक्षज ॥ ४१ ॥ प्रभोपुत्रैर्विनाशून्यंगार्ह
स्थ्यंकाननोपमम् ॥ इहामुत्रसुराधीशनैराश्यंतनयैर्विना ॥ ४२ ॥ इतिविप्रमुखोद्गीतांवाचमाकर्ण्यकेशवः ॥ उवाचवचनंश्रीमानतिहृष्टमनाविभुः॥
॥ ४३ ॥ विष्णुरुवाच ॥ शेषलांगूलतोविप्रविचित्रभुवनावधि ॥ संतिसौख्यान्यनेकानितानितेवितराम्यहम् ॥ ४४ ॥ नतुपुत्रसुखंतेस्तिद्वि
जराजकुलोत्तम ॥ दीयतेभाग्यनिर्दिष्टंतपसाहेतुनामुने॥४५ ॥अधुनासर्वदातास्मितनुजाभ्यर्थनंविना॥पुत्रगात्रपरिष्वंगस्तवभाग्येनविद्यते ॥ ४६ ॥
तस्मादन्यत्समाचक्ष्वतत्तेदास्यामिसुव्रत ॥ अर्जितंवर्षसाहस्रैस्तत्तेपुण्यंददाम्यहम् ॥४७॥ इत्युक्तोपरतेविष्णौद्विजःपरमदुर्मनाः ॥ पपातसहसाभूमौ
छिन्नमूलइवद्रुमः ॥ ४८ ॥ पतिंपतितमालोक्यरुरोदप्रमदाभृशम् ॥ निराशंपश्यतीनाथंबालाबालस्पृहासती ॥ ४९ ॥ उत्तिष्ठभूसुरश्रेष्ठशृणुष्ववच
नानिमे ॥ यद्भाग्यरचितंवस्तुलभेन्नारायणादपि ॥ ५० ॥यदिचेंदीवरश्यामंनारायणमधोक्षजम् ॥ समक्षीकृत्यनोप्राप्तस्तत्कुतोविंदसेविभो ॥ ५१॥
किंकरोतिरमानाथःकिंकरोतिसुरेश्वरः ॥ कैलासनिलयःशंभुर्भवानीवामहेश्वरी॥ ५२ ॥गजेंद्रवदनःश्रीमान्पितालोकपितामहः ॥वीतिहोत्रःकिंचकुर्या
न्मुनिर्वाकिंकरिष्यति॥५३॥ पितृराजोजलेशोवाअनंतोनागराडपि ॥ तस्यव्यर्थंभवेत्सर्वंव्यर्थस्तस्यपरिश्रमः ॥ ५४ ॥ शृणुनाथरमाकांतःकिंतेवद
तिसंगतः ॥ यदितेभाग्यविभ्रंशःकुतोदद्यात्तुपुत्रकम् ॥ ५५ ॥ अस्मद्भाग्यविनाशेनहरिदर्शनजंफलम् ॥इहदुःखायचोत्पन्नममुत्रसुखदंविभो ॥५६॥
क्रतुदानतपःसत्यव्रतेभ्योहरिसेवनम् ॥ वरंनाद्यापिपश्यामिभाग्यंतस्माद्बलाधिकम् ॥ ५७ ॥ श्रुत्वावचांसिब्राह्मण्याःशोकवेगाकुलानिच ॥ अत्यंतक्षो
भसंजातवेपथुर्विनतात्मजः ॥ ५८ ॥ पद्मनाभमुवाचेदंब्राह्मणीशोकपीडितः ॥ विप्रमालक्ष्यनयनक्षरद्बाष्पकलाकुलम् ॥ ५९ ॥ गरुडउवाच ॥
अहोतेदेवकीसूनोब्रह्मण्यत्वंकुतोगतम् ॥ यदिमंतापसंदीनंदृष्ट्वानालक्ष्यतेव्यथा ॥ ६० ॥ यदिकैवल्यदानेतेनास्तिविष्णोविचारणा ॥ पतितानाम
पिविभोनहिकिंतापसेदया ॥ ६१ ॥ कैवल्यंसिद्धयोऽप्यष्टौसार्वभौमादिसंचयः ॥ नह्यलभ्यास्तवस्मर्तुःकिंवराकीसुतस्पृहा ॥ ६२ ॥
तदस्मैदेहिगोविंदपुत्रमेकंगुणाधिकम् ॥ नदास्यसिहृषीकेशसदोषंतवचार्हणम् ॥ ६३ ॥ त्वदीयानुचराःसर्वेविनष्टाःकीर्तिदूषणात् ॥ मास्तुनः
श्रवणेवाक्यमिदंभूमन्कदाचन ॥ ६४ ॥ त्वामाराध्यजनःसर्वंफलंप्राप्नोतिवांछितम् ॥ तत्राप्ययंद्विजवरस्त्वत्पादांबुजसेवनम् ॥ ६५ ॥ अदां ॥ १४ ॥
भिकःकृपाशीलःसाधुसद्गुणभाजनः ॥ ब्राह्मणीचमहाभागात्वयिसंन्यस्तमानसा ॥ ६६ ॥ एनामालक्ष्यविश्वेशघृणातेकिंनजायते ॥ एतयोर्नै

त्रसंभूतोवारिधिःकिंकरिष्यति ॥ ६७ ॥ श्रुत्वासुपर्णवचनपीयूषंश्रुतिसुप्रियम् ॥ हरिःप्रसन्नःप्रोवाचवैनतेयंस्मरन्निव ॥ ६८ ॥ नागारेदेहि
विप्राययत्तेमनसिवांछितम् ॥ ममापिहृदयंतत्त्वमदत्त्वाद्विजचिंतितम् ॥ ६९ ॥ किंकरोम्यस्यभाग्येनममवक्त्राद्विनिर्गतम् ॥ ममापिस्यात्प्रियंह्ये
तद्ददातिचिंतितंभवान् ॥ ७० ॥ इत्याकर्ण्यहरेर्वाक्यंवैनतेयःप्रसन्नधीः ॥ ददौयथेप्सितंकामंविप्रायसुमहात्मने ॥ ७१ ॥ इति श्रीपद्मपुराणेपुरु
षोत्तममाहात्म्येसुदेवायवरप्रदानंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ वाल्मीकिरुवाच ॥ क्षोणीपतेततोजातंवृत्तांतंकथयाम्यहम् ॥ सुपर्णःके
शवादेशाद्वाक्यमाहद्विजेश्वरम् ॥ १ ॥ गरुडउवाच ॥ द्विजराजानृतंनाहंविष्णुःपद्मविलोचनः ॥ भाग्ययोगेनचसुखंभवतीहद्विजोत्तम ॥ २ ॥ विष्णुवा
क्यमनादृत्यनचेद्दास्यामितेसुतम् ॥ योहिमांस्पृशतेघोरोह्यभयःसर्वथानघ ॥ ३ ॥ तस्मान्ममांशतस्तुभ्यंसुतंदद्मिमनोहरम् ॥ येनत्वमाशिषःसत्याल
प्स्यसेगौतमीसुतम् ॥ ४ ॥ धन्योसिद्विजशार्दूलयत्तेजाताहरौमतिः ॥ सकामाप्यथनिष्कामाहरिभक्तिःसुखप्रदा ॥ ५ ॥ पल्लवाग्रलसद्बिंदुक्षणध्वंसिजने
वयः ॥ तत्रराघवपादाब्जंधन्यश्चिंतयत्तेहृदि ॥ विषयाविषरूपावैनराणांतुच्छसौख्यदाः ॥ ६ ॥ कौशल्येयमनादृत्यतेषुमूढोऽतिलंपटः ॥ ७ ॥ इंद्रिया
णिप्रमाथीनिबांधवाइवदुर्द्धियः ॥ तदर्थंजानकीनाथंनोपसर्पंतिमंदधीः ॥ ८ ॥ नाशंवसुमतीगंत्रीगंतारोगिरयोद्रुमाः ॥ आपगाःसागरानागाःसुरादैत्याः
खगामृगाः ॥ ९ ॥ यत्किंचिदृश्यतेलोकेस्थूलंसूक्ष्मंपरंचयत् ॥ सर्वनाशात्मकंपश्यन्नोपयातिजनार्दनम् ॥ १० ॥ अहोमोहांधतामिस्रमहोयंबुद्धिविभ्रमः
॥ नाशात्मकंसमालोक्यरघुवीरंनसेवते ॥ ११ ॥ किंसुपत्नीसुतोवापिकिंसुकन्याकथंसुहृत् ॥ कथंधनंकथंगेहंराज्यंभृत्यागजाहयाः ॥ १२ ॥
मृत्युनावर्तयंतीहबलात्कारोपयोजिताः ॥ धिग्जनंकोशलाधीशंनानुचिंतयतीहयः ॥ १३ ॥ तमृतेपुंडरीकाक्षंकोऽवलंबयतेपरम् ॥ नैवनैवेतिनैवेतिहरे
रन्योनतारकः ॥ १४ ॥ हरेःकृपावलोकेनमयादत्तःसुतस्तव ॥ संसारसंभवंसौख्यंभुंक्ष्वविप्रेश्वरक्षितौ ॥ १५ ॥ ॥ वाल्मीकिरुवाच ॥
दंपत्योःपश्यतोःसद्योदत्त्वावरमनुत्तमम् ॥ ससुपर्णःसलक्ष्मीकोहरिरंतरधीयत ॥ १६ ॥ सगौतम्यासुदेवोपिजगामनिलयंस्वकम् ॥
हर्षसागरमासाद्ययथेच्छमभजत्सुखम् ॥ १७ ॥ कालानुक्रमतस्तस्यांदोहदःसमपद्यत ॥ पांडुरंचमुखंदध्रेगौतमीपतिदेवता ॥ १८ ॥
अंतर्वत्नीरराजेयंभर्तुरानंदवर्धिनी ॥ यथापौरंदरीरेजेजयंतेगर्भमागते ॥ १९ ॥ साप्रसूतामहाभागाप्रसादमिवचेतना ॥ सुतंसर्वगुणोपेतंपूर्ण
चंद्रनिभाननम् ॥ २० ॥ जातकर्मादिकार्याणिचकारमुनिपुंगवः ॥ महताहर्षयोगेनस्वात्मानंबह्वमन्यत ॥ २१ ॥ अहोममाल्पभाग्य
स्यकुतः पुत्रस्यवैसुखम् ॥ विनादयांसुरेशस्यशंखचक्रगदाभृतः ॥ २२ ॥ इत्यानंदसमायुक्तःसर्वकार्याण्यथाकरोत् ॥ ब्राह्मणान्भो

जयामासविष्णुबुद्ध्यामहात्मनः ॥ २३ ॥ नामचास्याकरोद्धीमान्ब्राह्मणैःस्वजनैर्युतः ॥ असौशिशुःसुपर्णेनदत्तःप्रेम्णातिशोभनः ॥ २४ ॥यस्माच्छ्री
केनप्रहितोदिव्यतीवदिवाकरः ॥ शुकदेवेतिनाम्नायंतस्माद्भवतुबालकः ॥ २५ ॥ व्यवर्द्धतशिशुःशीघ्रंशुक्लपक्षइवोडुराट् ॥ पितुर्मनोरथैःसाकंमातुर्मा
नसनंदनः ॥ २६ ॥ क्रमाद्बभूवषड्वर्षःकंदर्पसमशोभनः ॥ कदाचित्तद्गृहाभ्याशमाजगाममुनिःस्वयम् ॥ २७ ॥ नारदःसुरसंकाशस्तेजसाप्रज्वलन्निव ॥
तमर्च्यविधिवद्विप्रस्तत्सुतसंगेसुतंस्वकम् ॥ २८ ॥ निधायपरयाभक्त्याननामानतकंधरः ॥ बालस्तवायंविप्रर्षेपाठ्यःसर्वात्मनेहितः ॥ २९ ॥ नारदः
स्नेहसंयुक्तःकुमारमवलोकयन् ॥ नयनोपगतंकृत्वास्मयित्वाचपुनःपुनः ॥ ३० ॥ उवाचगौतमीनाथंसुदेवंसात्विकंद्विजम् ॥ भोभोधन्योऽसियत्साधो
तुष्टस्तेयादृशोहरिः ॥ ३१ ॥ तपसाराधितःपुत्रंदत्तवानतिसुंदरम् ॥ किमत्रशृणुमेवाक्यंप्रसादेविष्णुसंभवे ॥ ३२ ॥ तिर्यगूर्ध्वमधोमानेह्यष्टोत्तरशतां
गुलः ॥ सुदेवतनयस्तेऽयंकिन्तुस्यात्पृथिवीपतिः ॥ ३३ ॥ अहोकिमेतत्पश्यामिकरेबालस्यधीमतः ॥ सच्छत्रंचामरयुगंहरेर्जेष्यतिकिंपुरम् ॥ ३४ ॥
कनिष्ठामूलतोरेषातर्जन्यंतमुपाश्रिता ॥ अक्षतानिर्मलादीर्घादीर्घायुष्यप्रदायिनी ॥ ३५ ॥ अच्छिद्राकाठिनौरक्ततलौपद्मोपमौकरौ ॥ राजांकमूचकौ
रक्तनखौदीर्घांगुलीशुभौ ॥ ३६ ॥ आजानुलंबिनौहस्तौहस्तितुल्यौसमांसलौ ॥ आवारिधेर्भूमिपालोभविष्यतिसुतस्तव ॥ ३७ ॥ मधुपिंगेक्षणः
श्यामःस्निग्धकुंचितमूर्द्धजः ॥ तुंगवक्षाःपृथुग्रीवःसमकर्णोवृषांसकः ॥ ३८ ॥ गूढजत्रुर्गूढनाभिस्त्रिवलीभूषितोदरः ॥ ह्रस्वलिंगःपद्मगंधिवीर्ययुक्तः
पृथुःकटिः ॥ ३९ ॥ सुजानुःसुंदरतरोजंघाभ्यांचशुभाकृतिः ॥ पाठीनपृष्ठसदृशःकोमलारक्तभूस्पृशौ ॥ ४० ॥ सुकुमारांगुलीसौम्याऊर्ध्वरेखां
बुजान्वितौ ॥ सुगुप्तगुल्फौसत्पार्ष्णीपादौतस्यमनोहरौ ॥ ४१ ॥ पाणिपादनखान्यक्षिंजिह्वोष्ठौरक्ततालुके ॥ अष्टौरक्तानिदृश्यंतेभाग्यचिह्नानिते
सुते ॥ ४२ ॥ मूत्रधाराशिरःकेशौदक्षिणावर्त्तिनायदि ॥ सालकंहृदयंविप्रदीर्घंसौख्यप्रकाशकम् ॥ ४३ ॥ सर्वलक्षणसंपूर्णःपुत्रोभाग्यनिधिर्द्विज ॥
निंद्यंनैवात्रपश्यामिपरमाणुनिभंक्वचित्॥४४॥इतिवाचमुदीर्यासौदेवर्षिःपरमद्युतिः ॥निःश्वसन्मौलिमाधुन्वन्पुनराहविचारयन् ॥४५॥ शुभंसंपश्यतेसर्वं
यदाकालःप्रदक्षिणः॥सयदाप्रतिकूलःस्यात्सर्वंनश्यतिहेलया॥४६॥सुदेवतनयस्तेऽयंद्वादशेहायनेगते॥मृत्युमेष्यतितत्रत्वंमाशोकेमानसंकृथाः ॥४७ ॥
अवश्यंभाविनोभावाभवंत्येवेश्वरेच्छया॥तत्रप्रतिविधिंनान्यःकर्त्तुमर्हतितंविना॥४८॥भवादृशांवदान्यानांधार्मिकाणांसुवर्चसाम्॥सज्जनप्रियकृत्कृष्णोना
सुखानिक्षमिष्यति ॥ ४९ ॥ वाल्मीकिरुवाच ॥ ॥ इत्युक्त्वानिर्ययौब्रह्मलोकंब्रह्मतनूद्भवः ॥ सुदेवःसहगौतम्यानिपपातधरातले ॥ ५० ॥
खातमूलेगिरिर्यद्वच्छिन्नमूलोयथातरुः ॥ ध्वजयष्टिर्यथावायोर्दंपतीधरणीगतौ ॥ ५१ ॥ व्यलुंठत्सुचिरंभूमावपस्मारहतोयथा ॥ ततःकिसलयस्प

द्विकरद्वंद्वांचितःक्षणात् ॥ ५२ ॥ सद्योमृतप्राप्तइवसंसुप्तस्थौद्विजोत्तमः ॥ अथसासुंदरीबालास्वकमादायबालकम् ॥ ५३ ॥ चुचुंबवदनंप्रेम्णाततः
स्वामिनमाहसा॥ द्विजराजनतेकार्याभीतिर्भाव्येषुवस्तुषु॥५४॥नाभाव्यंकुत्रचिद्भाविभाव्यंनैवविनश्यति॥अवश्यंभावियद्वस्तुसर्वथानोपलुप्यते॥५५॥
अवश्यंभाविभावानांप्रतिकारोभवेद्यदि ॥ तदादुःखैर्नबाध्यंतेनलरामयुधिष्ठिराः ॥ ५६ ॥ बंधनंदानवेंद्रस्यक्षयोयदुकुलस्यच ॥ कार्तवीर्यशिरश्छेदो
दशग्रीवविनाशनम् ॥५७॥ विरहोरामजानक्योर्लक्ष्मणस्यविवासनम् ॥ वालिगोपुच्छनिर्णाशस्त्रिशंकुतनयापदः ॥ ५८ ॥ वधोहिरण्यकशिपोर्वृत्रासुर
निर्बर्हणम् ॥ त्रैलोक्येतानिभोनाथज्ञेयान्यमितबुद्धिना ॥ ५९ ॥ बहूपायैरपिविभोनाभाव्यंभवतिक्वचित् ॥ भाव्यस्यापिनरःकर्त्तानासीत्सुरवरोऽ
पिसन् ॥६०॥ अकार्यंशक्यतेकर्त्तुंयदिकेनापिभूसुर ॥मागधारुद्धभूपालाःकथंजीवितमाप्नुयुः ॥ ६१॥ परीक्षिदपिराजर्षिःप्रह्लादोदानवोत्तमः ॥ भीमोऽ
प्यजगरग्रस्तःपार्थाभीष्मधनंजयाः ॥ ६२ ॥ लाक्षागृहेतदाकुंतीमृत्युवक्राद्विनिर्गता ॥ शंबरोव्याहरद्बल्लन्रौक्मिणेयंमहाबलम् ॥ ६३ ॥ पौलस्त्य
करगाताचित्राश्वोमृत्युपाशगः ॥ दशपुत्रपिताविप्रोनापपुत्रसुखंचसः ॥ ६४ ॥ एवंयेभाविनोभावास्तानालक्ष्यकदाचन ॥ द्विजराजनतेशंकाकार्या
चेतसिपुत्रके ॥ ६५ ॥ यद्यस्माकंसुखावाप्तिर्भवित्रीसुतसंभवा ॥ नसापकष्टुंशक्यावैसेंद्रैरपिसुरासुरैः ॥६६॥नकार्यस्तत्रसंत्रासःक्लेशोवापिकथंचन॥
नित्यंधर्मैरमस्वंत्वंमाशोकेमानसंकृथाः ॥ ६७ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येसुदेवस्यगौतम्याशोकापनोदनंनामचतुर्दशोऽध्यायः ॥१४॥
॥ वाल्मीकिरुवाच ॥ इतिताःशीतलावाचःसमाकर्ण्यप्रियामुखात् ॥ नियमेमानसंबुद्ध्वानिनायानिमिषंहितत् ॥ १ ॥ निःश्वासान्बहुलान्मुक्त्वासुशं
कितमनाश्चिरम् ॥ किंमेभावीतिमनसाचिंततेऽसौद्विजेश्वरः ॥ २ ॥ समित्कुशफलाहारःकदाचित्काननंययौ ॥ सुदेवःशांतकरणःकृष्णपादांबुजाश्रयः॥
॥३॥ तदास्यतनयःश्रीमाञ्जलवापींमनोरमाम् ॥ आविश्यक्रीडयामासवयस्यैरावृतःशुचौ ॥४॥ वारियंत्रैःक्षिपन्वारिपद्मगंधाधिवासितम् ॥ पद्मेपद्मेच
विहरन्विषयेषुमनोयथा ॥ ५ ॥ चातुर्यगुणसंयुक्तोबालकान्रमयत्यसौ ॥ आरुह्यारुह्यपानीयेनिपतन्पातयन्स्वकान् ॥ ६ ॥ जलक्रीडासुचतुरोवय
स्यैरावृतःसुधीः ॥ एवंद्विजातितनयेरमणासक्तमानसे ॥ ७ ॥ तत्रकश्चिन्महाग्राहोविधिनानोदितोबलात् ॥ पद्भ्यामाकृष्यतंबालंभीतमंतर्जलंगतः॥
॥ ८ ॥समानवयसःसर्वेहाहाकृत्वाप्रधाविताः ॥ गौतम्यैवेदयांचक्रुर्बहुशोकपरायणाः ॥ ९॥ मातस्तेतनयःक्रीडन्नस्माभिःसहितःसुहृत् ॥ जलेजलच
रग्रस्तःपरासुर्नविलोक्यते ॥ १० ॥ किशोरेषुवदत्स्वेवंदयायुक्तेषुभूपते ॥ आजगामवनाद्विप्रःसुदेवःसमिदाहरः ॥ ११ ॥ वज्रपातोपमंवाक्य
माकर्ण्यद्विजदंपती॥जग्मतुर्यत्रसावापीतनूजक्रीडनालया ॥ १२ ॥ तौतत्रतमपश्यंतौचक्रतूरुदनंबहु॥ तावत्पुरालयैस्ताभ्यांधृतःपुत्रोनिवेदितः॥१३॥

दृष्ट्वापुत्रंपरासुंस्वंछिन्नपक्षौयथाद्विजौ ॥ पेततुःशिथिलांगौतौछिन्नमूलाविवद्रुमौ ॥ १४ ॥ परमांग्लानिमापन्नौवुबुधातेनजीवितम् ॥ चिरात्कथंचिदा
लभ्यसंज्ञांपुत्रानुरागिणौ ॥ १५ ॥ आकृष्यसुतदेहंतावालिंग्यचपुनःपुनः ॥ अंकेपुत्रंनिधायादौचुचुंबतुरधोमुखौ ॥ १६ ॥ धैर्यमुत्सृज्यमंदौतौरुरुदंतौ
चपुनःपुनः ॥ वदपुत्रशुभांवाणीमस्मत्कर्णसुखप्रदाम्॥ १७ ॥नविहातुंभवानर्हःस्थविरौपितरौतव ॥ एतादृशानिवाक्यानिऊचतुर्दुःखितौभृशम् ॥१८॥
अयिशिशोमयितेविकृतंतवपरिचितंयदमुत्रविनिर्गतः ॥ सुविधुरंकरणंगलिताशिषःप्रविलपंतमिहैवविहायमाम् ॥ १९ ॥ तवकलाक्षरवाक्यसुधाघने
विरमितेहृदयंगमवर्णिनी ॥ विपुलशोकदलानलसंहृताममनोरथमाधविकाततिः ॥ २० ॥ सुतशुकेतिशुकेतिविलापितंकुररियूथमिवस्वजनं
चिरम् ॥ किमवलंब्यविधेविषयेशिशुंपरमितानयतासकलंहृतम् ॥ २१ ॥ अयिशिशोसुकुमारतनोकथंकुटिलतीव्रधनंजयदीप्तयः ॥ कलपिनाकिरणै
ररुणप्रभोअरुणतामगमद्वदनंतव ॥ २२ ॥ अयिविधेमयितेऽर्थमतिःकृतावतकुमारवधेनुविमुंचता ॥ किमितिनिर्दयमाननयस्यहोकमपराधमहंकृतवां
स्त्वयि ॥२३॥ तवमनोहरवक्रसमुद्गतकलपदालपितानिपुनःपुनः ॥ अतिसुखानिदहंतिहृदंतरंजवयजानियथासुतमागमान्॥२४॥द्रक्ष्यामिगेहमागत्यव
न्हिशालामृतेत्वया ॥ कथंभजामिसत्पुत्रकमरण्येसमाश्रये ॥ २५ ॥ नमयाचरितंगुह्यंब्रह्महत्यापिनोकृता ॥ स्त्रीहत्याभ्रूणहानास्मिकस्येदंकर्मणः
फलम् ॥ २६ ॥ अहोधातःकिमेतावत्त्वयालब्धंमहत्फलम् ॥ लोचनद्वंद्वमाकृष्टंदीनस्यममदुःखिनः ॥ २७ ॥ धातस्तातकृपांधेहिमयिदीनेवदामिते ॥
शुकदेवाश्रितंमार्गमह्यंलंभयमाचिरम् ॥ २८ ॥ निर्धनस्यधनंह्येतदंधस्यनयनंमम ॥ हृत्वाकिंतेशुभंभाविविधेदारुणदारुण ॥ २९ ॥ स्वेविप्रसुतास्तुभ्यं
भवंतिचयतःप्रियाः ॥ कथंनत्रायतेत्रासाज्जगद्वंद्योद्विजप्रियः ॥ ३० ॥ कुतोगत्वानुकिंकृत्वापृथिव्यंतमपिभ्रमन् ॥ द्रक्ष्येतवाननंसूनोसुनसंचारुलो
चनम् ॥ ३१ ॥ पर्जन्याद्व्यवतेवारिसूतेधान्यंधरापिच ॥ रत्नंतिमिरदुर्गेषुमुक्तासारंपयोनिधौ ॥ ३२ ॥ फलानिद्रुमषंडेषुधातवोऽचलसानुषु ॥ नतं
देशंप्रपश्यामियत्रगत्वामनोहरम् ॥ ३३ ॥ पुत्रगात्रंसमालिंग्यहृद्गतंदाहमुत्सृजे ॥ भूयोभूयःसमाश्लिष्यप्रकरोम्यश्रुमार्जनम् ॥ ३४ ॥ सुतकामपिवाचं
तेश्रावयाशुदयांकुरु ॥ जरठंपितरंदीनंवीक्ष्यनायातितेदया ॥ ३५ ॥ अननुज्ञाप्यमांवीरनकदापिगतोभवान् ॥ मामपृष्ट्वाकथंदीर्घंमार्गंयातोऽसिपु
त्रक ॥ ३६ ॥ निशायांपठनार्थायबोधयिष्यामिकंसुत ॥ साशुक्रोपररात्रांतेत्वामृतेवह्लभात्मज ॥ ३७ ॥ हरितःसावकाशामेसर्वाःशून्यास्त्वयावि
ना ॥ कुतोऽपितातततातेतिशुभांवाचंशृणोम्यहम् ॥३८॥ अरेप्रमादिताःप्राणाःकुतःस्वस्थाःकलेवरे ॥ कथंसुखाशयारूढाःकुतोनप्रचलं त्युत ॥ ३९ ॥
श्रुत्यनुसारिणींवाचंकस्यश्रोष्यामिपुत्रक ॥ गेहमध्यसमासाद्यधिग्मांदुर्जीविनंखलम् ॥ ४० ॥ त्वामनुस्मरतोवीरंकलवाक्यंमनोहरम् ॥ शतधादीर्यते

नाद्यहृदयंह्यायसंमम ॥ ४१ ॥ बहुमानस्यसंकल्पवह्नीप्रज्वलिताधुना ॥ अत्यंतपापिनोमेद्यपुनरुद्भवतेकथम् ॥ ४२ ॥ मन्येसुधन्यंकिलकौशलेशंयः
काननंदाशरथौप्रयाते ॥ दधारनोसूंस्तनयाधिदग्धोधिग्मांतनूजप्रलयेप्यनष्टम् ॥ ४३ ॥ धन्योधनेशावरजस्तनूजमाकर्ण्यकीर्णरघुवीरबालात् ॥ पुत्रा
धितुन्नःप्रविवेशरामवह्नितुधिग्मामलयंसुतार्तम् ॥ ४४ ॥ गोविंदविष्णोरघुनंदनेशसीतापतेदाशरथेमुरारे ॥ दीनानुकंपिन्भगवन्दयालोमांत्राहिमग्नं
सुतशोकवारिधौ ॥ ४५ ॥ श्रीकृष्णनारायणवासुदेवगोविंदविष्णोभगवन्मुरारे ॥ श्रीयादवेशाऽखिललोकनाथमांत्राहि० ॥ ४६ ॥ हरेविभोकंस
निषूदनाघमर्दिन्बकारेमधुकैटभारे ॥ घोराहिमूर्द्धांगणखेलनाद्यमांत्राहि० ॥ ४७ ॥ देवाधिदेवाखिललोकनाथगोपालबालोग्रनिपीतवह्ने ॥ कलिं
दकन्यारमणैकबंधोमांत्राहि० ॥४८॥ वैकुंठविष्णोनरकासुरारेचराचराधाररथांगपाणे ॥ काकुत्स्थवंशाधिपकोशलेंद्रमांत्राहि० ॥४९॥ मूढोमदन्योभवते
नकोपियोदेवकीसूनुवचोविलंघ्य ॥ पुत्रेदुराशांकृतवान्सुरेशलभेतकोदिष्टविनष्टवस्तु ॥५०॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येसुदेवस्यपुत्रविलापो
नामपंचदशोऽध्यायः॥१५॥वाल्मीकिरुवाच॥एवंविलपतस्तस्यबहुशोकयुतस्यच॥अकालजलदोभ्यागाद्गर्जन्नाच्छादयन्दिशम् ॥ १ ॥ ववर्षाविरतंवा
रिनूनंस्फुरितविद्युतः॥अत्यासारातिवाताभ्यांतर्जयन्निवमानवान् ॥२॥ गंभीरतमसालुप्तदिग्विवेकविकल्पकः ॥ ववर्षमासमात्रंचसांवर्तकइवापरः॥३॥
सनविज्ञातवान्किंचित्पुत्रशोकानियंत्रितः ॥ तथैवसुतमादायरुरोदकुररोयथा ॥ ४ ॥ नपयोबुबुधेचैवजलपन्नान्यन्नकिंचन ॥ नचचालनसुष्वापनो
पलेभेसुखंस्थितः ॥ ५ ॥ तदज्ञाततपोजातंपुरुषोत्तममासतः ॥ विष्णुःकमलपत्राक्षःप्रादुरासीन्महामनाः ॥६॥ प्रादुर्भूतेजगन्नाथेविलीनाःपापराशयः॥
ददर्शकमलाकांतंभूषणंलक्ष्मणाग्रजम् ॥ ७ ॥ द्विजस्तुष्टमनाःपुत्रदेहंभूमौनिधायच ॥ सपत्नीकोनमश्चक्रेदंडवज्जानकीपतिम् ॥८॥ कोटिचंद्रसमाह्लादं
कोटिसूर्यादिभासुरम् ॥ प्रसन्नवदनांभोजंसुपर्णोपरिराजितम् ॥ ९ ॥ तंहरिंसायुधंदृष्ट्वाविस्मितोभूद्द्विजोत्तमः ॥ भगवानपिविश्वात्मातुष्टस्तत्कर्म
रंजितः ॥ १० ॥ उवाचप्रश्रितांवाणींपीयूषस्राविणींमुदा ॥ द्विजसाधनसंभूतपुण्यर्द्धिबहुयंत्रितः ॥ ११ ॥ श्रीविष्णुउवाच ॥ भोभोद्विजवरश्री
मान्पुण्यवानासिसांप्रतम् ॥ त्वद्भाग्यमानंकर्तुंनोमयाप्यन्यैर्नशक्यते ॥ १२ ॥ शृणुधात्रीसुरेशान यत्तेभाविब्रवीमिते ॥ वर्षद्वादशसाहस्रंपुत्रोयंते
सुखप्रदः ॥ १३ ॥ तादृशंपुत्रसौख्यंत्वंप्राप्स्यसिद्विजसत्तम ॥ देवमानवनागाश्चऋषयोयक्षकिन्नराः ॥ १४ ॥ त्वत्तनूजसुखंवीक्ष्यसस्पृहास्त्वत्प्रशं
सकाः ॥ त्वामेवबहुमन्यन्तेभविष्यंतिसुतोत्सुकाः ॥ १५ ॥ यथान्येतपसालब्धाःपुत्राहिसुखदायकाः ॥ भवंतिनतथाविप्रमयादत्तःसुतस्तव ॥ १६ ॥
पुरामुनीश्वरःकश्चिद्धनुषाख्योमहामनाः ॥ मृतियुक्तान्सुतांल्लोकेपश्यन्दीनमनाभवत् ॥ १७ ॥ सतपस्तप्तवान्नद्याःपुलिनेत्वन्नवर्जितम् ॥ तपंतंबहुकालं

तमीयुःसेंद्राःसुरावदन् ॥ १८ ॥ वरेणच्छंदयामासुरमरंवृतवान्सुतम् ॥ तमूचुर्निर्जरानैवममरःकोऽपिभूतले ॥ १९ ॥ पुनराहद्विजोदेवान्निमित्तायुर्भवे
त्सुतः ॥ सुराःप्रोचुर्निमित्तंकिंवदसोप्यवदद्द्विजः ॥ २० ॥ धनुषाख्यःसुतंलेभेकालेनाल्पेनमानद ॥ सपुत्रोववृधेतस्यसाकंहर्षेणमानदः ॥ २१ ॥
ततपुत्रंपाठयामाससर्वाविद्यांमहामनाः ॥ स्वपुत्रंविद्ययायुक्तंदृष्ट्वोवाचमुनीश्वरः ॥ २२॥ चरपुत्रमुनीन्सर्वान्विद्ययाविजयन्सदा ॥ तथेत्युक्त्वाचचारासौ
मुनिमंडलमुद्विजन् ॥ २३ ॥ वरदानकृतोत्साहोब्राह्मणानवमन्यत ॥ कदाचिन्महिषोनामऋषिःपरमकोपनः ॥ २४ ॥ शशापमुनिपुत्रंतमद्यैवमरणं
व्रज ॥ चेतसाचिंतयामासनिमित्तायुरयंभवेत् ॥ २५ ॥ इतिचिंतयतातेननिःश्वासात्प्रकटीकृताः ॥ महिषाःकोटिशोविप्रतैर्गिरिःशकलीकृतः ॥ २६ ॥
ममारमुनिपुत्रोऽपिधनुषाख्योतिदुःखितः ॥ विलप्यबहुकालंसगृह्यपुत्रकलेवरम् ॥ २७ ॥ प्रविवेशपितावार्ह्निसुतदुःखातिपीडितः ॥ एवंबलात्तपुत्राये
भवेयुर्नातिसौख्यदाः ॥ २८ ॥ अयंतुतनयस्तुभ्यंसुपर्णोममवाहनम् ॥ इहजन्मनितेदत्त्वापुत्रसौख्यातिदुर्लभम् ॥ २९ ॥ मृतस्त्वंब्रह्मणोलोकेवसिष्य
सिसुखैर्युतः ॥ बहुकालंततोऽवन्यांचक्रवर्त्तीभविष्यसि ॥ ३० ॥ तदापित्वंमहापुण्यैःक्षितौख्यातोभविष्यसि ॥ संवत्सराणांनियुतत्रयंराज्यंकरिष्यसि॥
॥ ३१ ॥ चत्वारस्तनयाभाव्यास्तत्रपुत्रीचतेऽपरा ॥ भार्याचात्यंतसुभगाइयमेवभविष्यति ॥ ३२ ॥ भुक्त्वाभोगान्सुदुष्प्रापान्सुरैरप्यमराधिपैः ॥
अयमेवतदापुत्रस्त्वन्निस्तारनिमित्तभूः॥ ३३ ॥ भविष्यतिशुकोभूत्वावाक्यमेकंवदिष्यति ॥ श्रुत्वावाक्यंशुकप्रोक्तंनिर्विण्णस्त्वंगृहाश्रितः ॥ ३४ ॥
दुर्मनाश्चिंत्यमानस्तुवाल्मीकिंमुनिमाप्स्यसि ॥ तेननिर्भिन्नसंदेहजालःसद्योविमुक्तिमान् ॥ ३५ ॥ कालोत्तमांगमाकृष्यपदासव्येनभूसुर ॥ मदीयमुत्त
मस्थानंसपत्नीकःसमेष्यसि ॥ ३६ ॥ यद्गत्वाननिवर्तंतेशांताःसंन्यासिनोऽमलाः ॥ एवंप्रवदतस्तस्यविष्णोरमिततेजसः ॥ ३७ ॥ द्विजात्मजः
समुत्तस्थौपित्रोरानंदयन्मनः ॥ सुराःसर्वेचसंतुष्टाःकुसुमैर्ववृषुर्मुहुः ॥ ३८ ॥ सुप्रसन्नादिशोजाताःसानंदाःसर्वजंतवः ॥ ननामशुकदेवोपिपितरंमात
रंहरिम् ॥ ३९ ॥ सुपर्णोप्यतिसंहृष्टःससुतंवीक्ष्यभूसुरम् ॥ दंपतीअतिसंहृष्टौपरिषस्वजतुर्मुदा ॥ ४० ॥ द्विजोभूच्चकितस्तूर्णमतिविस्मितमानसः ॥
प्रोवाचभुवनेशानंकेनतुष्टोसिमेविभो ॥४१ ॥ चतुर्वत्सरसाहस्रंतपस्तप्तंपुरामया ॥ नददौकिंसुतंमह्यंभाग्यहीनस्त्वितिब्रुवन् ॥ ४२ ॥ अधुनाकेनमे
भाग्यमुद्भूतंजगदीश्वर ॥ येननष्टंसुतंभोगानन्यजन्मनिदुर्लभान् ॥ ४३ ॥ तदंतेमोक्षमेवापिसुरैरपिसुदुर्लभम् ॥ तन्मेब्रूहिमहाराजसंशयोत्रमहान्मम ॥ ॥१७॥
॥ ४४ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येसुदेवस्यपुत्रजीवनंनामषोडशोऽध्यायः ॥१६॥ श्रीविष्णुरुवाच॥ द्विजराजकृतंयत्तेनैतदन्यःकरिष्यति ॥
जितंयेनममाप्युच्चैःपदंदेवैर्दुरासदम् ॥ १ ॥ अयंलोकोऽपिविजितस्तुष्टश्चाप्यहमद्भुतम् ॥ नतद्वेत्तिभवान्नूनंयेनाहंतुष्टिमाप्तवान् ॥ २ ॥ अयंममप्रियो

मासःप्रयातःपुरुषोत्तमः ॥ कामात्क्रोधाच्चविद्वेषाल्लोभाद्दंभाद्भयादपि ॥ ३ ॥ एकमप्युपवासंयःकरोत्यस्मिन्द्विजोत्तम ॥ स्नानंवापिरजोमात्रंदानंवाचा
पिशोभनम् ॥ ४ ॥ सोऽनेकजन्माचरितकोटिपातकपंजरम् ॥ भित्त्वाप्नोतिमहत्स्थानंनिर्मलंस्वेनकर्मणा ॥५॥ सुतशोकमिषेणाद्यत्वयातप्तंमहत्तपः ॥
मासमात्रंनिराहारस्त्वकालजलदोभ्यगात् ॥ ६ ॥ त्रिषुलोकेषुतेविद्वन्स्नानानिप्रतिवासरम् ॥ अभ्रावकाशंदुःप्रापमस्मिंछ्रंध्वंत्वयातपः ॥७॥ जितासनो
जिताहारोजितालोकोजितेंद्रियः ॥ मन्नामालापचतुरःशोकेनापिभवानभूत् ॥८॥ निरहंकारिणाविप्रयत्कृतंतेकरोतिकः ॥ नैतत्कर्त्तुंपुमाञ्छक्तस्त्वदन्यः
पृथिवीसुर ॥ ९ ॥ अयंलोकःपरोलोकःपरात्परतरोपिते ॥ जितस्त्वनेनकृत्येनकिंपुनःपरिपृच्छसि ॥ १० ॥ त्वदीयसाधनस्यास्यमहिमानंद्विजोत्तम॥
नाहंवक्तुंसमर्थोस्मिकथमन्यःक्षमोभवेत् ॥ ११ ॥ सुदेवउवाच ॥ कोसौमासस्त्वयाविष्णोवर्ण्यतेबहुविस्तरम् ॥ किमस्मिन्करणीयंस्यात्कोविधि
र्नियमश्चकः ॥ १२ ॥ किंप्रदेयंचकोदेवःसर्वंविष्णोवदस्वमे ॥ इष्टदेवोसिमेस्वामिन्भुक्तिमुक्तिप्रदप्रभो ॥ १३ ॥ नारायणउवाच ॥ मासाःसर्वेद्विजश्रे
ष्ठसूर्यदेवस्यसंक्रमाः ॥ अधिमासस्त्वसंक्रांतिर्मासोसौशरणंगतः ॥ १४ ॥ ममप्रियतमोऽत्यंतंमासोयंपुरुषोत्तमः ॥ अस्याहंसततंविप्रस्वामित्वेपर्य
वस्थितः ॥ १५ ॥ पुरुषोत्तमतातस्मादस्यजातामदात्मनः ॥ मासेष्वन्येषुमेस्वाम्यमीदृशंनकदाचन ॥ १६ ॥ सर्वमासेषुयत्कृत्यंतत्स्वामीकश्यपा
त्मजः॥ पुरुषोत्तममासेषुयानिकृत्यानिमानद॥१७॥तेषामहंप्रभुःसम्यक्फलदातास्मिसर्वदा ॥ शृणुविप्रफलंह्यस्मिन्कर्त्तव्यस्यचमेऽनघ॥१८॥सम्यक्ची
र्णेनतपसाशतवर्षमितेनच ॥ यत्फलंलभतेविप्रमासेस्मिन्नेकवासरात् ॥१९॥ कोटिशोब्राह्मणान्सम्यक्संभोज्यस्वर्णभाजने ॥ विविधैःशोभनैरत्नैर्यत्पु
ण्यमुपलभ्यते ॥ २० ॥ सावित्रीलक्षजाप्येनलभ्यतेयत्फलंनरैः ॥सकृन्मंत्रजपेनैवमासेस्मिन्नुपलभ्यते ॥ २१ ॥ तत्पुण्यंलभ्यतेमासिसकृद्ब्राह्मणतर्प
णात् ॥ नालभ्यंदृश्यतेकिंचिन्मत्प्रियेपुरुषोत्तमे ॥ २२ ॥ द्वादशाक्षरमंत्रोयंयोजपेत्कृष्णसंनिधौ ॥ दशवारमपिब्रह्मन्सकोटिफलमश्नुते ॥ २३ ॥
कृत्यंपुरुषोत्तमेयत्तुपुनात्यासप्तमंकुलम् ॥ पंचाक्षरींमहाविद्यांपंचकृत्वोऽपियोजपेत् ॥ २४ ॥ विधूयाघसहस्राणिसयातिपरमंपदम् ॥ सुभक्त्याफलमू
लाद्यैर्यदितर्पयतेद्विजम् ॥ २५ ॥ तेनस्युर्भोजिताविप्राःशतशःपुरुषोत्तमे ॥ षड्वर्णमष्टवर्णंवायःस्मरेत्पुरुषोत्तमे ॥ २६ ॥ शतवारमपिब्रह्म
न्सकोटिफलमश्नुते ॥ दरिद्रार्णवमुत्क्रम्यवैभवंभुविलभ्यते ॥ २७ ॥ विष्णोरनुग्रहंप्राप्यगाणपत्यपदंव्रजेत् ॥ मासंसर्वोत्तमंप्राप्यजानकीजीवनंहरि
म् ॥ २८ ॥ नपूजयतिमंदात्मासगच्छेन्नरकंचिरम् ॥ ध्वजारोपणमुच्चैर्योमासेस्मिन्हरिमंदिरे ॥ २९ ॥ करोतिचैलखंडेनतस्यपुण्यफलंशृणु ॥ वी
णावाद्यमृदंगाद्यैर्वादित्रैर्नृत्यगायनैः ॥ ३० ॥ स्तुतिंविष्णोःकरोत्युच्चैर्मोदत्याखंडलांतिके ॥ मोदित्वायुगसाहस्रंपश्चाद्धरिपदंव्रजेत् ॥ ३१ ॥ दीपदा

नस्यसाहस्रंशृणुसर्वभयापहम् ॥ सौवर्णेराजतेताम्रेपैत्तलेपार्थिवेऽपिच ॥ ३२ ॥ तैलेनचघृतेनापिभाजनेदीपदोनरः ॥ अत्यंतंसुखमाप्नोतिमत्प्रिये
पुरुषोत्तमे ॥ ३३ ॥ भक्त्वाभोगाञ्छुभान्भोगान्संवत्सरगणान्बहून् ॥ पश्चात्प्रयातिसालोक्यंब्रह्मणःपरमात्मनः ॥ ३४ ॥ तस्मात्सर्वात्मनाकार्योदीपः
श्रीविष्णुमंदिरे ॥ मन्मंदिरगतंध्वांतंयेनदीपैर्विनाशितम् ॥३५॥ तस्यत्वंतर्गतंध्वांतंक्षिणोम्यंतस्थितोह्यहम् ॥३६॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्ये
पुरुषोत्तमेकर्तव्यतायावर्णनंनामसप्तदशोऽध्यायः ॥ १७ ॥ श्रीविष्णुरुवाच ॥ ॥ समाप्यैवंशुभंमासमेकस्मिन्नपिवासरे ॥ सुरसद्मसुदीपोवैनकृतोमं
दभाग्यतः ॥ १ ॥ कथंतस्याल्पभाग्यस्यजन्मकोटीगतंदृढम् ॥ दारिद्र्यंनाशमायातिदुर्भाग्यस्याकृतात्मनः ॥ २ ॥ नालोकिविष्णुवदनंदीपज्योतिः
प्रकाशितम् ॥ मासेसर्वोत्तमेपुण्येतस्यकिंस्याच्छृणुष्वतत् ॥३॥ दरिद्रोव्याधितोमूर्खःषंढःसर्वत्रनिंदितः ॥ यत्रयत्रावतारीस्यान्नेत्ररोगीव्रणीजडः ॥४॥
येयेनयनरोगाढ्याद्दृश्यंतेभुविमानवाः ॥ तेतेज्ञेयाद्द्विजश्रेष्ठपरदारावलोकिनः ॥ ५ ॥ अग्निंधातुंरविंचंद्रंगांविप्रंन्यासिनंगुरुम् ॥ हरिंब्राह्मणमीशानमे
षांभक्तंपरस्त्रियम् ॥ ६ ॥ उच्छिष्टानिर्विशंकाश्चप्रेक्षंतेयेनराधमाः ॥ पतंतिनरकेघोरेपश्चान्नयनरोगिणः ॥ ७ ॥ सकथंपातकान्मर्त्योमुच्यतेभवपा
शतः ॥ नालोकयतिमासेस्मिन्दीपज्योतिर्गतंहरिम् ॥ ८ ॥ येनाहंकमलानाथोनार्चितस्तुलसीदलैः ॥ सुगंधैःकोमलैर्गंधैःसकथंमुक्तिमाप्स्यति ॥ ९ ॥
अन्यैःकोटिमितैःपुष्पैःपूजानारायणेकृता ॥ सुगंधतुलसीपत्रैरेकेनापिकृताभवेत् ॥ १० ॥ वृंदादलैर्जगन्नाथंभक्त्यासंपूजयन्नमन् ॥ आत्मनासाकमु
द्धृत्यदशपूर्वान्दशापरान् ॥ ११ ॥ प्रयातिपरमंस्थानंयत्रगत्वानशोचति ॥ शालग्रामशिलायेनपूजितापुरुषोत्तमे ॥ १२ ॥ जननीजठरावासीनभूयोजा
यतेनरः ॥ शालग्रामशिलातोयंपीतंयेनाप्रमादिना ॥ १३ ॥ नभूयःपिबतिप्राज्ञःस्तन्यंमातुःकदाचन ॥ चंपकैःकरवीरैश्चजातीचंपकमुद्गरैः ॥ १४ ॥
कर्णिकारैश्चकमलैर्बिल्वपत्रैःसुशोभनैः ॥ मल्लिकायूथिकाकुंदैर्मालतीकिंशुकोत्करैः ॥ १५ ॥ कैलासनिलयःसर्वैश्चार्चितःपुरुषोत्तमे ॥ तेनसर्वंजितंमन्ये
त्रैलोक्यंस्वीकृतंपुनः ॥ १६ ॥ नतदस्तिपदंब्रह्मंस्तदलभ्यंतुयद्भवेत् ॥ सर्वंशतधृतिर्विष्णुर्नानृणस्तस्यकुत्रचित् ॥१७॥ तिलतुल्यंनमेध्यंस्याज्जगत्सु
द्विजसत्तम ॥ पृथिव्यांसर्वदानेभ्यस्तिलदानंविशिष्यते ॥१८॥ तिलद्रोणंद्विजेंद्रायसहिरण्यंप्रयच्छति ॥ यत्रकुत्रापिसंयातिविष्णुमासप्रभावतः ॥१९॥
कुरूपःकुत्सितोनस्यान्नाल्पायुर्नचमत्सरी ॥ नदरिद्रीनचात्यागीकृपणोनचदुर्भगः ॥ २० ॥ नानार्योनचदुर्मेधानपापीनचरोगवान् ॥ तिलदःपुरुषो
धन्यस्तिलदःपुरुषःशुचिः ॥ २१ ॥ तिलोदकंपितृगणेदत्तंभवतिचाक्षयम् ॥ तिलहोमकृतोवह्निर्देवानामपितृप्तिदः ॥ २२ ॥ तिलान्दत्त्वासकृद्धुत्वा
पुरुषोत्तमवासरे ॥ आत्मबुद्धिंप्रपद्याशुब्रह्मलोकेमहीयते ॥२३॥ तिलमेकमपिप्राज्ञेविप्रेदत्त्वाभवेच्छुचिः ॥ विक्रयंचपुनःकुर्वन्नरकेयातिदारुणे ॥२४॥

तिलधेनुंगुडधेनुंमधुधेनुंजलस्यच ॥ विष्णोर्मासिद्विजेंद्रायप्रयच्छन्गर्भगोनहि ॥ २५ ॥ शय्यांसोपस्करांधेनुंशुभानिभूषणानिच ॥ व्यंजनानिविचित्रा
णिकर्पूरागुरुचंदनम् ॥ २६ ॥ स्वर्णरूप्यकांस्यताम्रभाजनानिघनानिच ॥ गजंचवाजिनंदिव्यंमहिषींस्यंदनानिच ॥ २७ ॥ शिबिकानुचरादास्यो
वनिताभूषणानिच ॥ उमामहेश्वरंविप्रतिलपात्रंहवींषिच ॥ २८ ॥ सर्वंदेयंद्विजेंद्रायआत्मवित्तानुसारतः ॥ पुण्येविष्णुप्रियेमासिपुरुषोत्तमतुष्ट
ये ॥ २९ ॥ यद्यश्नातिनरोनित्यंगृहेह्यन्यस्यब्राह्मणाः ॥ अन्नप्रस्थमुपादायकुंभेनित्यंप्रपूजयेत् ॥३०॥ यावन्ममदिनंविप्रद्वादश्यामर्चयेद्धरिम् ॥ कलशं
दक्षिणांतस्मैभक्त्यादद्यात्समाहितः ॥ ३१ ॥ तत्कर्ताचजनःकश्चिन्नान्यपीडामवाप्नुयात् ॥ नकदाचिद्भवेद्दुःखीसंकटंनाभिपद्यते ॥ ३२ ॥ नकश्चिन्नरकं
पश्येन्नापिजाठरवेदनाम् ॥ सदाभोगीसदादातानकदाचिदृणीभवेत् ॥ ३३ ॥ नियमान्पालयेन्नित्यंयावन्मासावधिर्भवेत् ॥ मासांतेमंडलंकृत्वादिव्यैर्धा
न्यैःसुशोभनम् ॥ ३४ ॥ अव्रणंस्थापयेत्कुंभंसौवर्णंराजतंपुनः ॥ ताम्रजंमार्त्तिकंवापित्वन्नेनैवप्रपूरयेत् ॥ ३५ ॥ वेष्टयेत्पट्टकूलैस्तुसौवर्णंपुरुषोत्तमम् ॥
स्थापयित्वाचतत्पात्रेपूजयेत्सर्वसाधनैः ॥ ३६ ॥ उपचारैःषोडशभिःपूरयेत्पुरुषोत्तमम् ॥ ब्राह्मणान्गुणसंपन्नान्वरयेद्दिनसंख्यया ॥ ३७ ॥ कुंडलैः
कंकैर्णह्र्द्यैश्छत्रवस्त्रोपवीतकैः ॥ पदमुद्रासनाहारैरर्चयेद्द्विजसत्तम ॥ ३८ ॥ यथाविष्णुंतथाविप्रान्पूजयेद्भक्तिमान्नरः ॥ विप्रेनारायणेभेदंकुर्वन्नाप्नोति
किल्बिषम् ॥३९॥ विष्णुंसंपूजयन्भक्त्याब्रह्मद्वेषंसमाचरेत् ॥ महाव्रतंकृतंतस्यसर्वंभवतिनिष्फलम् ॥४०॥ तस्माद्विप्रेऽच्युतेनैवविभेदंकारयेत्सुधीः ॥
एवंदिवानिशंविष्णुंसंपूज्योत्सवकीर्त्तनैः ॥ ४१ ॥ भास्करोदयवेलायांप्रार्थयेज्जगदीश्वरम् ॥ देवदेवजगत्स्वामिन्प्रसीदजगदीश्वर ॥ ४२ ॥ कृतेनाने
नमेदेवत्राहिमांभवसागरात् ॥ कृतंन्यूनाधिकंयन्मेविष्णोमासेतवप्रिये ॥ ४३ ॥ स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणम् ॥ उपोषणंनित्यदानंनियमा
दिसुरार्चनम् ॥ ४४ ॥ द्विजपूजांभूतरक्षांयत्किंचित्कृतवानहम् ॥ अतिरिक्तंखिलंवापियद्भवेत्पुरुषोत्तम ॥ ४५ ॥ सर्वंतवप्रसादेनपुरुषोत्तमसेवनात् ॥
द्विजेंद्रवचनाद्वापियातुमेपरिपूर्णताम् ॥ ४६ ॥ इत्यानम्यद्विजान्सर्वान्स्वस्तिवाच्यविसर्जयेत् ॥ लक्ष्मींविष्णुंमंडलंचविप्रायविनिवेदयेत् ॥ ४७ ॥
यदिष्टंस्वस्यसततंदेयंवित्तानुसारतः ॥ ब्राह्मणान्भोजयेद्भक्त्यादक्षिणांभूरिदापयेत् ॥ ४८ ॥ पश्चात्स्वजनमध्यस्थःस्वयंभुंजीतवाग्यतः ॥ अनेन
विधिनाचीर्णंव्रतोयातिकृतार्थताम् ॥ ४९ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येकृतस्यकर्मणोमहिमवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ श्रीभगवा
नुवाच ॥ दुर्लभंमानुषंजन्मलब्धंपूर्वकृतैःशुभैः ॥ पश्चान्नचिंतयन्मूढःपुनर्मेकिंभविष्यति ॥ १ ॥ अहोमौढ्यंजनेऽत्यंतंरूढंसर्वत्रपश्यत ॥ पुरुषोत्तममासं
तुश्रुत्वामुक्तिप्रदंसुखात् ॥ २ ॥ विहायपरिधावंतिसर्वतोमृगतृष्णया ॥ शीतपानीयसंपूर्णांवापीमुत्सृज्यपार्श्वतः ॥ ३ ॥ गंगासुमोहमापन्नाभ्रमंतिगतचे

तसः ॥ अन्यकर्मसमासक्ताविहायपुरुषोत्तमम् ॥ ४ ॥ तेषांदुरात्मनांविद्धिनियतंनिरयस्थितिः ॥ भजंत्यभाग्यसंपूर्णाःकथंतेपुरुषोत्तमम् ॥ ५ ॥
येषामनियमाद्यातोमन्मासःपुरुषोत्तमः ॥ जन्मजन्मनिदुर्भाग्याःपरभाग्योपजीविनः ॥ ६ ॥ रोगिणोभग्नसंकल्पादारिद्र्येणोपजीविनः ॥ यत्रयत्रापिकुं
वंतितत्रतत्रातिदुःखिनः ॥ ७ ॥ कुरूपाःकुत्सितारौद्रामूर्खामूढातिलोलुपाः ॥ पुत्रपौत्रसुखातुष्टाःपापिनोनष्टजीविनः ॥ ८ ॥ स्त्रियोपिविधवाहीनाः
कुरूपाःक्षीणवैभवाः ॥ मातृकैःपैतृकैःसौख्यैर्भातृपितृसुखैरपि ॥ ९ ॥ वर्जितानाथविकलागुणचारित्रदूषिताः ॥ यत्रयत्रप्रदीयंतेतत्राप्यत्यंतदुःखिताः
॥ १० ॥ ईदृशायेप्रदृश्यंतेसृष्टौभूमिसुरोत्तम ॥ विद्धितानपिपापिष्ठान्मूढान्पंडितमानिनः ॥ ११ ॥ पुरुषोत्तममासस्यविमुखान्क्षुद्रकर्मिणः ॥ तस्मा
त्सर्वात्मनाविप्रभवान्धन्योसिसांप्रतम् ॥ १२ ॥ यदस्मिंस्तत्तवानुग्रंतपःपरमभासुरम् ॥ ममप्रियात्मनानित्यंमन्मासःपुरुषोत्तमः ॥ १३ ॥ येयेदी
नतरानित्यंदिवारात्रौबुभुक्षिताः ॥ भ्रमंतिपरगेहेषुधिक्कारामान्नतुष्टयः ॥ १४ ॥ निराशाभग्नसर्वाशाःसुरविप्रपराङ्मुखाः ॥ सदादुर्वृद्धिबहुलाःकटुवाक्याः
कुचैलिनः ॥ १५ ॥ आनिशीथमपिग्रासंसर्वेषुकांक्षिणःक्षितौ ॥ सदारोगसमायुक्ताविप्रियाःसर्वजंतुषु ॥ १६ ॥ जायंतेईदृशाःसर्वेयेषांव्यर्थोगतोमम ॥
अत्यंतवल्लभोमासोमत्प्रियःपुरुषोत्तमः ॥१७॥ तस्मात्सर्वात्मनाविप्रसंसेव्यःपुरुषोत्तमः ॥ समत्प्रियःपुमाँल्लोकेसधन्योभाग्यपारगः ॥ १८ ॥ नाराधय
तिमांपुण्यराशिरन्यःकृतोनरैः ॥ मन्मासविमुखैस्तेषांसर्वंभवतिनिष्फलम्॥१९॥वाल्मीकिरुवाच ॥ एवमुक्त्वासहस्राक्षोहरिर्गरुडवाहनः ॥ जगामाकाशमा
विश्यवैकुंठनिलयंप्रभुः ॥२०॥ गौतमीचसुदेवश्चमुमुदातेचहर्षितौ ॥ अतीवहर्षितौश्रुत्वाप्रभावंपुरुषोत्तमम् ॥२१॥ ततःप्रभृतिविप्रोऽसौतंमासंमुदितोऽ
र्चयत् ॥ तेनपुत्रेणशुशुभेजयंतेनेवनाकराट् ॥२२॥ पितरंशुकदेवोऽपिनंदयामासतत्कृतम् ॥ क्रमंतंबहुलंकालंयत्सुखाविष्टचेतनम् ॥२३॥ बुबुधेनसुदे
वोऽपिह्यहोरात्रमिदंभ्रमात् ॥ वसिष्ठःशक्तिनायद्वत्कुमारेणसतापितः ॥ २४ ॥ प्रद्युम्नेनरमाधीशःपांडुर्यद्वत्किरीटिना ॥ जयंतेनयथाशक्रःकानी
नेनपराशरः ॥ २५ ॥ मुमुदेसचधर्मात्मातेनपुत्रेणधीमता ॥ ध्यायन्देवंजगन्नाथंचक्रपाणिनमीश्वरम् ॥ २६ ॥ स्तुवन्मासंचविष्णुंचप्रेम्णासंपूजयन्नमन् ॥
ब्रह्मलोकप्रदेभ्योऽपिकर्मभ्योमन्यताद्भुतम् ॥ २७ ॥ सर्वदुःखापहंमासंवरिष्ठंपुरुषोत्तमम् ॥ ददावीजेजपीपाठीतास्मिन्नेवाभजद्धरिम् ॥ २८ ॥ भुक्त्वाभो
गान्यथाकामंवर्षसाहस्रकालिकम् ॥ जगामब्रह्मणोलोकंनातिशीतंनघर्मदम् ॥ २९ ॥ यत्रनायान्विनोयांतिनातप्ततपसोजनाः ॥ असत्यवादिनोलु
ब्धानत्वचीर्णबृहद्व्रताः ॥ ३० ॥ यत्रगत्वानशोचंतिवसंतिब्रह्मणोऽतिकम् ॥ ब्राह्मःसंवत्सरोयावत्सौख्यमापद्द्विजोत्तमः ॥ ३१ ॥ सोयं ॥ १९ ॥
भवान्समुत्पन्नोदृढधन्वेतिविश्रुतः ॥ लब्धवानतुलंसौख्यंसुराणामपिदुर्लभम् ॥ ३२ ॥ तेनपुण्येनभूपालःसत्यंसत्यंनसंशयः ॥ एतत्तेसर्वमाख्यातं

पृष्टवानसियन्मम ॥ ३३ ॥ सौख्यकारणमत्युग्रंजातंतेपूर्वदैहिकम् ॥ शृणुष्वशुकवृत्तांतंपृष्टंयद्भवतामम ॥ ३४॥ पूर्वजन्मनितेभूपशुकदेवोऽभवत्सुतः॥
साक्षात्सुपर्णःस्वांशेनसमुत्पन्नःकृपावशात् ॥ ३५ ॥ तेनैतच्चिंतितंभूपयक्षकुक्षावहंसुतः ॥ तस्यमास्तुपुनर्जन्मघोरेसंसारसंकटे ॥ ३६ ॥ तवाप्यस्तिमह
त्कृत्यंपुरुषोत्तमसंभवम् ॥ तेनासौकीररूपेणदर्शयामासतेऽग्रतः ॥ ३७ ॥ न्यग्रोधविटपारूढःश्रावयामासतद्वचः ॥ येनवैराग्यमापन्नोजनोयातिकृतार्थ
ताम् ॥ ३८ ॥ शुकस्यकारणंयत्तत्तवसौख्यप्रदायकम् ॥ श्रावितंतेमहाराजपृष्टोहंयत्त्वयानघ ॥ ३९ ॥ अथोऽनुज्ञातुमिच्छामिघोरासंध्याप्रवर्त्तते ॥
सरयूमापगांपुण्यांयास्याम्याप्लुवनायवै ॥ ४० ॥ इत्यादिश्यमुनिश्रेष्ठस्तमामंत्र्यमहीपतिम् ॥ पूजितस्तेनचात्यर्थंथविस्मितेनपुनःपुनः ॥ ४१ ॥ जगा
माकाशमाविश्यब्रह्मभूतोमुनीश्वरः ॥ राजाप्यत्यंतचकितश्चिंतयामासचेतसा ॥ ४२ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येवाल्मीकिनादृढधन्वनः
पूर्ववृत्तांतकथनानंतरंवाल्मीकिप्रस्थानंनामैकोनविंशोऽध्यायः ॥ १९ ॥ सूतउवाच ॥ अहोमासस्यमाहात्म्यंमहाश्चर्योत्तरंपरम् ॥ किमेतन्मुनिनामह्यं
ध्वांतौघोदारितःक्षणात् ॥ १ ॥ धिग्मांभोगेच्छयामूढंकामक्रीडासुलंपटम् ॥ अज्ञानपीडितंक्षुद्रस्त्रीणांक्रीडामृगंखलम् ॥ २ ॥ नकिंचिद्दृश्यतेस्था
यिजगत्स्थावरजंगमम् ॥ धिक्क्रियांधिक्चह्याध्यक्ष्यंधिक्चातुर्यमकल्पकम् ॥ ३ ॥ धिग्विद्यांधिग्गुणान्प्रौढान्यन्मृत्युर्ननिवर्त्तते ॥ ब्रह्मांडंकवलीकुर्व
न्वर्त्ततेऽतीवदुर्घटः ॥ ४ ॥ वाल्मीकिगमनादूर्ध्वमतिनिर्विण्णचेतसा ॥ चिंतयन्मुनिराजानमिदमाहमहीपतिः ॥ ५ ॥ किंमयाक्रियतेऽत्यंतमूढबुद्ध्याकु
मेधसा ॥ नमयाराधितोविष्णुःकोटिब्रह्मांडनायकः ॥ ६ ॥ चिंताशान्तुतुदन्नित्यंतुच्छभोगायुतान्विता ॥ कामलुब्धाचविक्षिप्ताद्दुर्गाविषयवागुरा ॥७॥
पंगुंकरोतिसत्पादमंधयत्यपिसेक्षणम् ॥ मच्चित्तंचेतनाहीनंसुवाचंमूकतांगतम् ॥ ८ ॥ किमहंमोहितोऽत्यंतंनारीसद्रूपसंपदा ॥ केनवापुनरावृत्तिंगताः
कलुषचेतसः ॥९॥ आंत्रनिर्बंधशकलेरक्तमज्जानखायुते ॥ केशास्रकफविण्मूत्ररोमलालाविडंबिते ॥१०॥ अहोमोहस्यमाहात्म्यंपश्यताऽद्भुतमुद्गतम्॥
क्लेदस्थितिचयेमांसकर्दमालिप्तकोटरे ॥११॥ नवकोटरनिर्गच्छद्विष्ठामूत्रकफान्विते ॥ कृमिकीटगदव्याप्तेस्वल्पायुषिगतत्रपे ॥१२ ॥ नारीकलेवरेतुच्छे
किमहंमोहितश्चिरम् ॥ यतोनज्ञातवान्कालंममायुर्दलनक्षमम् ॥१३॥ एवंपापतरानारीसन्मार्गप्रतिबंधिनी॥कामधीवरदुर्जालंनानाविषयमामिषम्॥१४॥
मत्तुल्यनैकशफरीबंधनार्थंप्रसारितम्॥दुस्तीर्णेदुःखसलिलपूर्णेसंसारवारिधौ ॥१५॥ केमत्पुत्राःकुतोराज्यंकुत्रगेहानिवापुरम्॥कुत्रैतेस्वजनामात्याःपाश
पाणावुपस्थिते ॥१६॥ नसुतानपितामातानभ्रातानापिबांधवाः ॥ नशरीरंनमित्राणिनकोशःसुहृदःसखा ॥१७॥ नगृहाणिनमित्राणिवैभवंनचतुर्विधम्॥
नापिदारागुणारामानविद्यासौष्ठवंसुधीः॥१८॥संरंभकुटिलोद्भूतभ्रूलताकृष्टजीवितात्॥कालदुर्दर्शवैतालात्क्षेमंगच्छंतिमानवाः॥१९॥ विनानारायणंविष्णुं

देवदेवंसनातनम् ॥ यास्यामिशरणंतस्मान्मंक्षुदेवंगदाधरम् ॥२०॥ इतिनिश्चित्यभूपालःप्रोवाचगुणसुन्दरीम् ॥ प्रियेबहुतरंकालंभुक्तंसौख्यंत्वयासह ॥
॥ २१ ॥ इदानीमस्मिसंवृत्तोमामनुज्ञातुमर्हसि ॥ इत्युक्तवतिराजेंद्रेकिंचिन्मानसुपेयुषी ॥२२॥ उवाचपृथिवीपालंसुंदरीगद्गदाक्षरम् ॥ राजन्ममनो
बुद्धिशरीरंजीवितंत्वयि ॥ २३ ॥ प्राणेशोऽस्तिभवान्मह्यंत्यक्त्वाकिंनुप्रयास्यसि ॥ त्वयासार्द्धंसुखंभुक्त्वाक्वत्रस्थास्यामिमेवद ॥ २४ ॥ त्वद्देहवर्तिनीं
छायांमांविजानीहिभूमिप ॥ कांतावचनसंतुष्टःप्रोवाचनृपतिःप्रियाम् ॥ २५ ॥ अतिधन्यासिसुश्रोणिनत्वांत्यक्ष्यामिसुंदरि ॥ एहिसाकंमयारण्यंच
रिष्येदुश्चरंतपः ॥ २६ ॥ इतोऽष्टमदिनादूर्ध्वंमासोऽस्तिपुरुषोत्तमः ॥ तावत्तनूद्भवंज्येष्ठंवरिष्ठंगुणभूषणम् ॥ २७ ॥ धर्मसंरक्षणार्थायप्रशमाये
तरस्यच ॥ इतिनिश्चित्यभूपालःपुत्रंराज्येऽभ्यषेचयत् ॥ २८ ॥ब्राह्मणांकेसमाधायमंत्रिषुन्यस्यसत्क्रियाः ॥ वरवैराग्यमापन्नोजगामादिशमुत्तराम् ॥
॥ २९ ॥ यतःप्रवर्ततेगंगास्वर्धुनीसरितांवरा ॥ तस्याःकूलंसमाश्रित्यसपत्नीकःस्थितोमुनिः ॥ ३० ॥ प्राप्तंहरिप्रियंवीक्ष्यतंमासंपुरुषोत्तमम् ॥
तपस्तेपेसधर्मात्मानिर्जरायेनविस्मिताः ॥ ३१ ॥ ऊर्ध्वबाहुर्निरालंबःपादांगुष्ठाश्रितावनिः ॥ ऊर्ध्वदृष्टिर्निराहारःस्थिरचित्तःसमानतः ॥ ३२ ॥ धन्यो
ऽयमितिसिद्धौघैःसादरंप्रविलोकितः ॥ जजापपरमंजाप्यंस्मरन्नारायणंहरिम् ॥ ३३ ॥ एवंप्रतपतस्तस्ययावत्कृष्णत्रयोदशी ॥ दिनेतस्मिन्महीपालो
जगामतमसःपरम् ॥३४॥ वैकुंठाख्यंहरेर्धामस्पृहणीयंसुरैरपि ॥ तेनैववपुषाविद्वन्गतोऽसौहरिमंदिरम् ॥ ३५॥ सानारीस्वपतिंवीक्ष्ययातंवैकुंठसद्मनि॥
किंचिन्म्लानमुखीसाध्वीक्षणंदुःखान्विताभवत् ॥ ३६ ॥ संभ्रांतायूथविभ्रष्टामृगीवायतलोचना ॥ दृष्टंनिर्ज्जरचक्रैश्चदिक्चक्रंवीक्ष्यविस्मिता ॥ ३७ ॥
स्थिताभूमौविशुद्धेनस्वासनंपरिकल्प्यच ॥ पार्ष्णिनागुदमापीड्यवायुमुत्सारयच्छनैः ॥ ३८ ॥ ततःसमानंनाभिस्थंकृत्वासापानमूर्ध्वगे ॥ हृदिप्राणं
समाधायप्राणंसोदानमूर्ध्वगम् ॥ ३९ ॥ आज्ञाचक्रमुपाधायभ्रूमध्यमनयच्छनैः ॥ सर्वतोव्यानमाकृष्यतत्रानीयगतत्वरा ॥ ४० ॥ करांगुलिभिःसं
रुध्यखानिसर्वाणिसुंदरी ॥ भर्तृपादौहृदिध्यात्वाचिरोपास्तावतिप्रियौ ॥ ४१ ॥ प्राणापानगतीरुद्ध्वासाध्वीविगतकल्मषा ॥ कृत्वाग्निधारणांदेहंभस्मी
भूतंचकारसा ॥ ४२ ॥ साचदेहक्षयादर्वागास्फोट्यब्रह्मरंध्रतः ॥ जगामभर्तृसालोक्यंयत्रयांतिपतिव्रताः ॥ ४३॥ एवमाराध्यमासाद्यदृढधन्वामहीपतिः॥
पुरुषोत्तममाहात्म्याज्जगामपरमंपदम् ॥ ४४ ॥ वर्णयामिकिमद्याहंयदेकरसनामम ॥ नेदृशोऽस्तिमहामासःसत्यंसत्यंभृगूद्वह ॥४५ ॥ इहलोकेऽतुलंसौ
ख्यंपरलोकेऽतुलांगतिम् ॥ पूजितोभगवान्यस्मिन्कोटिकल्मषनाशकृत् ॥४६॥व्याजेनापिकृतेह्यस्मिन्स्नानेदानेकृतेशुभे ॥कोटिजन्मकृतानेककिल्बिषौ
घनिकृंतनम् ॥४७॥ जायतेमुनिशार्दूलयथाशाखामृगोगतः ॥अज्ञानतःकृतेनापित्रिरात्रस्नानमात्रतः ॥४८॥ पुराकृतानांदुर्गाणांकर्मणांनिष्कृतिःप्रभो॥ ॥ २० ॥

ततोविश्वंभरप्राप्तिर्महिमावर्ण्यतेकिमु ॥४९॥ कानामवानरश्रद्धायेनतुष्टोहरिःस्वयम् ॥ त्रिरात्रस्नानमात्रेणवस्तुशक्तिर्बलीयसी ॥५०॥ अहोनरामूढतराः
किमुमासंनसेवते ॥ विष्णुप्रियंप्रतापाग्र्यमुत्तमंपुरुषोत्तमम् ॥ ५१ ॥ तेधन्याःकृतपुण्यास्तेज्ञातोयैःपुरुषोत्तमः ॥ नाम्नापिपावयत्यज्ञंकिमुदानजपा
दिभिः ॥ ५२ ॥ सुखरोगपरित्यक्तफलैरन्योपयोगिभिः ॥ एतद्दानेनकपिराङ्गतोगतिमनुत्तमाम् ॥ ५३ ॥ इतिश्रीपुरुषोत्तममाहात्म्येदृढधन्वनःसपत्नी
कस्यवैकुंठप्राप्तिवर्णनंनामविंशतितमोऽध्यायः ॥ २० ॥ छ ॥ शौनकउवाच ॥ सूतसूतमहाभागविस्मयोमेमहानिह ॥ सर्वार्थसाधनोदेहोमानुषोऽयमि
तिश्रुतः ॥ १ ॥ अन्येषुसर्वदेहेषुसाधनेनमतिर्भवेत् ॥ कथंशाखामृगोऽप्यद्धामुक्तोयस्यप्रभावतः ॥२॥ किमसौवर्ण्यतेवीरमासोवैपुरुषोत्तमः ॥ कथयस्व
कथामेतांममचित्तप्रसादिनीम् ॥३॥ कुत्रासौकृतवान्कृत्यंत्रिरात्रंसूतनंदन ॥ कोसौकपिःकिमाहारःकिमाचारःकुतोवसन्॥४॥वदश्रीकृष्णमासस्यमाहा
त्म्यमतिविस्तरात् ॥ नतृप्तिर्जायतेत्वत्तःशृण्वतोमेकथामृतम् ॥५॥ सूतउवाच ॥ द्विजराजकथामेतांवर्णयामिसमाहितः ॥ यद्विश्रुतिसुपर्णेनलीयन्ते
कल्मषाह्वयः ॥ ६ ॥ कश्चित्केरलदेशीयोद्विजःपरमलोभवान् ॥ नित्यंधनचयेदक्षःसरघावद्धसुप्रियः ॥ ७ ॥ लोकेकदर्यइत्याख्यांगतस्तेनैवकर्मणा ॥
चित्रकेतिपुरानामतस्याभूत्पितृकल्पितम् ॥ ८ ॥ नान्नमश्नातिनोवस्त्रंपरिधत्तेशुभंक्वचित् ॥ नजुहोतिददात्यन्नंनकदापिद्विजातये ॥ ९ ॥ महाश्रमेणसत
तमकरोद्भूरिसंचयम् ॥ पंचसूनादोषनाशनिमित्तंनचकारसः ॥१०॥ पितृपक्षेपितृदिनेनश्राद्धंकृतवानसौ ॥ नचमाघेकृतंतेनतिलदानंकदाचन ॥ ११ ॥
कार्तिकेदीपदानंचनारायणपदाप्तये ॥ वैशाखेधान्यदानानिव्यतिपातेकदाचन ॥ १२ ॥ दधिचशर्कराचैवगुडमिश्रंनलड्डुकम् ॥ वैधृतौरूप्यदानंचद्वाद
श्यामन्नमेवच ॥ १३ ॥ संक्रमेचैवनोदत्तंचन्द्रसूर्यग्रहेकिमु ॥ सर्वत्रदीनवाक्यानिवक्तिकृपणवासनः ॥ १४ ॥ अहोबुभुक्षितोऽत्यंतंममकिंचिन्नविद्यते ॥
चतुर्थेपंचमेवापिभुंक्तेऽसौवासरेशठः ॥१५॥ कदाचिन्नियतंलब्धंविक्रीणातिरहःकुधीः ॥ जीर्णेनवाससाच्छन्नःपापकृद्विचरत्यसौ॥१६॥वर्षवातातपैःशीतै
र्नित्यंश्यामकलेवरः॥बभ्रामपृथिवींसर्वांमहालौल्यातिपीडितः ॥१७॥ तस्यातिमित्रःसद्वाटीपतिःकश्चिद्वनेचरः॥ मालाकारःप्रसन्नात्मादीनंज्ञात्वाऽकरो
त्कृपाम्॥१८॥धिक्कृतंसर्वलोकेषुस्थितिंतत्रचकारसः ॥ नित्यंतन्निकटस्थायीतस्याज्ञापरिपालकः॥१९॥अतिविश्वस्तचित्तेनतेनासौवाटिकावने ॥ कृतः
सर्वात्मनासम्यङ्ममायमितिबुद्धिना॥२०॥राजकार्यगरीयस्त्वान्नायातिवाटिकावनम्॥कदाचित्स्वामिनासार्द्धंसमायातिसस्त्वरम्॥ २१ ॥चित्रकःसततं
चिन्वन्भक्षयन्फलसंचयम् ॥ पक्वान्यश्नन्स्वयंनित्यंविक्रीणन्फलराशयः ॥२२॥ द्रविणंतद्भवंसर्वंस्वयंगृह्णात्यशंकया ॥ यदापृच्छद्वनाधीशस्तदावदति
निस्त्रपः ॥ २३ ॥ भिक्षामश्नामिसततंपरिचर्यामितेवनम् ॥ तथापिपत्रिणःसर्वेफलान्यश्नंतिनित्यशः ॥२४॥ पश्याश्नंतोमयाकेचिन्नाशितागगनेचराः॥

तेषामस्थीनिमांसानिपिच्छानिपतितानिच ॥ २५ ॥ प्रत्ययार्थैवधंचक्रेपक्षिणांवसुलोलुपः ॥ एवंप्रवर्त्तमानस्यजग्मुर्वर्षाणिदुर्द्धियः ॥ २६ ॥ सप्ताशीति
द्विजेशानोजराजर्जरितस्तदा ॥ कृतांतलुलितःकालकल्पदर्वीकरार्दितः ॥ २७॥ तमीयुःसहसाकालानुचराःकृष्णपिंगलाः ॥ यदालोकनतःसद्योजीर्णे
हृदयपंजरम् ॥ २८ ॥ ममारमूढधीर्नासौलब्धवानग्निसत्क्रियाम् ॥ पापानिफलदानिस्युर्नाभुक्काप्रव्रजंतिहि ॥ २९ ॥ सौरिसेविकराकृष्टःस्रवन्नयननी
रवाट् ॥ हाहाकुर्वन्महानादंकशाघातनिपीडितः ॥ ३० ॥ जगामकृच्छ्रतोमार्गमपुण्यजनभीषणम् ॥ स्मरन्पूर्वकृतंकर्मप्रलपन्गद्गदाक्षरम् ॥ ३१ ॥
अहोहापश्यताज्ञानंममानार्यस्यदुर्मतेः ॥ आसाद्यमानुषंदेहंदुर्लभंत्रिदशैरपि ॥ ३२ ॥ किंकृतंधनलोभेनव्यर्थंनीतंशुभंवयः ॥ किंकरोमिपराधीनः
कालपाशवशंगतः ॥ ३३ ॥ चिरकालार्जितंसर्वंमहायासैःकुमेधसा ॥ किंकरोमिपराधीनःकालपाशवशंगतः ॥ ३४ ॥ नमयामानुषंजन्मलब्ध्वाकिं
चिच्छुभंकृतम् ॥ हुतंनह्यग्नौकिंचिच्चनदत्तंदानमर्थिने ॥ ३५ ॥ क्षुधितेनान्नमुत्सृष्टंननीरंतृषितेजने ॥ तिलोदकंपितृभ्योऽपिनसुरेभ्योयवोदकम् ॥३६॥
नमाघेश्यामलश्वेतेपानीयेमज्जनंकृतम् ॥ नमाधवेमुक्तिकर्तृनर्मदामज्जनाच्छुचिः ॥३७॥ त्रिरात्रमुषितोनापिश्रीमत्सारस्वतेतटे ॥ नकालिंदीतटंदिव्यमा
श्रितःसप्तवासरम् ॥ ३८ ॥ सद्यःपातककोट्यौघशोषिशुभ्रसुरापगा ॥ विगाहितामहापुण्यानैवदुष्कृतकारिणा ॥ ३९ ॥ नचविष्णुप्रियेमासेविख्याते
पुरुषोत्तमे ॥ कुत्रापिस्नातवान्मूढोनाहंपाप्मातिदुष्टधीः ॥४०॥ नमयासेवितागंगाश्रीमन्मासेहरिप्रिये ॥ गोमतीवापिकावेरीप्रियावापिकलिंदजा ॥४१॥
ख्यातासरस्वतीक्षिप्रायावाकापिसमुद्रगा ॥ अहोमत्संचितंद्रव्यंस्थितंभूमौनिरर्थकम् ॥ ४२ ॥ यावज्जीवन्परिक्लिष्टंस्वात्मादुर्बुद्धिनामया ॥ कदा
पिजाठरोवह्निर्नान्नैःसंतर्पितोमया ॥ ४३ ॥ नापिसद्वाससाच्छन्नःस्वदेहःकृपणात्मना ॥ नज्ञातयोबांधवाश्चस्वजनाःपार्श्ववर्तिनः ॥ ४४ ॥ भागिने
याःसुतायामिर्जनित्रीजिनकोनुजाः ॥ वध्वोऽनुजांगनाजायाह्यन्येऽपिमानवास्तथा ॥ ४५ ॥ सदन्नैरेकवारंचतर्पितानमयाक्वचित् ॥ अष्टचत्वारिंशकेषुसं
स्कारेषुनमेऽभवत् ॥ ४६ ॥ संस्कारोमानुषेदेहेदुर्गतिंयेननाप्नुयाम् ॥ कांगतिंनुगमिष्यामितरण्यात्मजलंभिताम् ॥ ४७ ॥ भुक्त्वाजीवकृतंकर्ममुक्तिर्ना
स्तिकदापिमे ॥ एवंविलपमानंतंनिन्युर्वैवस्वतांतिकम् ॥४८॥ तदाज्ञयाप्रेतयोनिमापन्नस्तत्क्षणादसौ ॥ पश्चात्तमूचिवान्सौरिरभ्यर्णासन्नमंत्रिणः॥४९॥
अहोऽयंनीयतांविप्रःपापबुद्धिर्मदाज्ञया॥शतायुतानिवर्षाणांप्रेतत्वमतिदारुणम्॥५०॥परकीयाणिभुक्तानिसुधाकल्पान्यसंख्यया ॥ फलान्यनेनचौर्येणत
स्मादस्मैप्रदीयताम् ॥५१॥ त्रयोदशायुतंकृत्वाकपिजन्मभयप्रदम्॥वर्षवातातपहिमक्षुत्तृड्व्याधिभयाकुलम् ॥५२॥ पश्चादहंप्रदास्यामिवह्वीर्नरकया
तनाः॥दशार्बुदानिवर्षाणिप्रतिकुंडंनिवत्स्यति॥५३॥इतितेनसमादिष्टामंत्रिणोभीषणाननाः॥तथाचक्रुःप्रभोराज्ञांदुष्टविप्रेसमाहिताः॥५४॥प्रेतदेहंततोमु

क्त्वाकाननेद्रुमवर्जिते ॥ निर्जलेबहुकालंसकपित्वमगमद्द्विजः॥५५॥दिव्येकालंजरेशैलेजंबूखंडेमनोहरे ॥ तत्रदिव्यसरःप्रख्यंकुंडंशक्रविनिर्मितम्॥५६॥
कुररीमुररीकृत्यकुररःकिलकूजति ॥ यत्रोच्छलज्जलच्छन्नपक्षच्छायालसच्छुचि ॥५७॥ मृगतीर्थमितिख्यातंसुराणामपिदुर्लभम् ॥ यत्रेयुःस्वर्गतिंशुभ्रां
पितरःपूर्वदैहिकीम् ॥ ५८ ॥ किंचित्कारणमुद्दिश्यजातायेमृगरूपिणः ॥ तत्रासौप्रथमंजन्मकपित्वंलब्धवान्खलः ॥ ५९ ॥ शौनकउवाच ॥ पौराणिक
ममब्रूहितीर्थेत्रैलोक्यपावने ॥ उवाससकथंशाखामृगःपातककोटिमान् ॥ ६० ॥ सूतउवाच ॥ ब्रह्मन्धन्योसिसच्छ्रोताकृतकृत्योस्म्यहंत्वया ॥ सामान्यं
कारणंकिंचिदत्रास्त्यतिपुरातनम् ॥ ६१ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येकदर्यविप्राख्यानेएकविंशोऽध्यायः॥२१॥ सूतउवाच ॥ यदादाशरथी
रामोनाममात्रभयापहः ॥ यन्नामस्मृतिमात्रेणतरेदंजोभवांबुधिम् ॥ १ ॥ हतवान्रावणंयुद्धेबद्ध्वासेतुंमहोदधौ ॥ विभीषणाहतेकोपिराक्षसोनावशेषितः॥
॥ २ ॥ ततस्तनूनपाच्छुद्धाजानकीस्वीकृतामुना ॥ रावणेचहतेतस्मिन्ब्रह्मरुद्रसुरेश्वरैः ॥ ३ ॥ प्रीतैर्वरंवृणुष्वेतिवचस्युक्तेततोब्रवीत् ॥ रामोराजी
वपत्राक्षःकालकोटिदुरासदः ॥ ४ ॥ सुराःशृणुध्वंमेवाक्यंयदिदेयोवरोऽस्तिमे ॥ एतेवैवानराःशूरारक्षोभिर्भक्षिताहताः ॥ ५ ॥ अक्षताजीवमानास्ते
संतुमत्प्रियकारिणः ॥ यत्रयत्रवनेवीरावसेयुर्मेवनेचराः ॥६॥ पत्रपुष्पफलैर्नम्राःसुच्छायाःसंतुतेद्रुमाः ॥ करलभ्यानिवारीणिशीतलानिवनानिच ॥७॥
एषोऽस्तुमेवरोदेवाःकपिजातिर्ममप्रिया ॥ तथेत्युक्तेतुतेसर्वेजग्मुर्देवास्त्रिविष्टपम् ॥ ८ ॥ अतोरामप्रभावेणयत्रशाखामृगोभवेत् ॥ तद्वनंफलपानीयपु
ष्पपत्रचयावहम् ॥ ९ ॥ परंतुपापपुण्याभ्यांसुखदुःखान्यनुव्रजेत् ॥ महावानररूपेणववृधेपर्वतोपमः ॥ १० ॥ क्षुधातुरोतिपापेनदीर्घतृडतिलोलुपः ॥
जन्मतस्तस्यवक्रेऽभूद्व्यथापरमदारुणा ॥ ११ ॥ ययानवनवस्त्राविशोणितंवर्त्ततेऽनिशम् ॥ अत्यंतवेदनाविष्टोभोक्तुंकिंचिच्छशाकन ॥ १२ ॥ पानी
यमपिनोपातुंसेहेप्राक्तनकर्मतः ॥सचवानरचापल्याद्द्रुमेभ्यःफलकोटयः ॥ १३ ॥ लुनातिवदनाभ्याशमानीयत्यजतित्वरम् ॥ समिद्धोजाठरोवह्निरनि
शंदहतेभृशम् ॥ १४ ॥ तृषाकुलितसर्वांगःसशुष्कगलकंदरः ॥ इतस्ततोलुंठमानोह्यतीववेदनातुरः ॥ १५ ॥ द्रुमाद्द्रुमंभ्रमन्दीनोमेनेमृत्युंसुखावहम् ॥
कदाचित्पततेपृथ्व्यांजलपतेविकलस्वरम् ॥ १६ ॥ रौतिग्लानिमवाप्नोतिनिरिभ्रष्टोयथाझषः ॥ कापेयचापलत्वेनभ्रमन्गच्छतिवासरम् ॥ १७ ॥
एवंक्षुधासमाविष्टःश्वथद्गात्रोवमन्मुखः ॥ पेतुर्दंतास्ततःसर्वेव्रणानांरुधिरप्लुतिः ॥१८॥ एवंप्रवर्ततस्तस्यनिराहारस्यनित्यशः ॥ दैवयोगादुपागच्छत्सश्री
मान्पुरुषोत्तमः ॥ १९ ॥ तस्मिन्नपितथैवास्तेशीतवातातपादिषाड् ॥ कदाचिद्बहुलेपक्षेविचरन्गहनेवने ॥ २० ॥ तृषितःकुंडनिकटेपानीयंनापिबत्क
चित् ॥ क्षुधितश्चपलत्वेनतत्रोच्चैर्वृक्षमारुहत् ॥ २१ ॥ वृक्षाद्वृक्षान्तरंगच्छन्न्यपतज्जलकुंडले ॥ चिरंतननिराहाराच्छुष्कसर्वेंद्रियप्रभः ॥ २२ ॥

निर्बलःशिथिलप्राणःपतन्निवविनिर्गतः ॥ भ्रमतीतस्ततस्तत्रभुजाभ्यांवारिदोलयन् ॥ २३॥ सोपानमाजगामाशुपतञ्छैवालतःक्षणात् ॥ नचकश्चित्स
मागत्यवारयामासवानरम् ॥ २४ ॥ एवंदिनत्रयंयावद्बभ्रामजलमध्यतः ॥ तदेवास्यतपोजातंभगवत्कृपयाद्विज ॥ २५ ॥ तृतीयदिवसेमध्यंगतेभास्व
तिवानरः ॥ परासुरपतत्तीर्थवारिक्लिन्नकलेवरः ॥ २६ ॥ उत्सृज्यसहसादेहंकापेयंगतकल्मषः ॥ सद्योदेवत्वमापन्नोरेजेतीवमनोहरः ॥ २७ ॥
कंदर्पकोटिलावण्योनीलनीरदसन्निभः ॥ स्फुरत्किरीटवलयोविलसच्चपलांबरः ॥ २८ ॥ केयूरमुद्रिकाहारोलसत्कटकनूपुरः ॥ कटिसूत्रोब्रह्मसू
त्रश्चलन्मकरकुंडलः ॥ २९ ॥ कांचीकलापविभ्राजत्कटिर्मणिमयांगदः ॥ त्रैलोक्यमोहनंरूपंबिभ्रन्विभ्राजयन्दिशः ॥ ३० ॥नीलकुंचितसुस्निग्धचिकुरा
वृतसन्मुखः ॥ चतुर्बाहुर्लसन्मूर्त्तिर्यामिनीपतिसच्छविः ॥ ३१ ॥ तद्भासाकाननंसर्वंरुरुचेकांचनप्रभम् ॥ यावदाक्रम्यगगनमास्थितःपुरुषोत्तमः ॥
॥ ३२ ॥ तावद्विमानमागच्छद्धरिसेवकधिष्ठितम् ॥ वीणामृदंगपटहपणवानकगोमुखान् ॥ ३३ ॥ भेरभेरीलसच्छंखनिःसाणमुरुजादिकान् ॥ वादय
द्भिर्नरवरैराश्रितंबहुलोत्सवैः ॥ ३४ ॥प्रमदाभिर्विचित्राभिरनुकूलाभिरावृतम् ॥ ३५ ॥ विद्याधरैरप्सरोभिर्गंधर्वैःकिन्नरोरगैः ॥ नानासेवाक्रियाव्यग्रै
स्तदालोक्यमहोत्सवैः ॥ ३६ ॥ विलोक्यविस्मितोऽतीवस्मृतपूर्वकृतावलिः ॥ कश्चित्तदुपरिच्छत्रंपांडुरंशशिभासुरम् ॥ ३७ ॥ दधारव्यजनैरेवं
वीजयन्नपरःस्थितः ॥ चामरंजगृहेकश्चित्तांबूलान्यग्रतोपरः ॥ ३८ ॥ खचितंरत्नसाहस्रैःपात्रंस्वर्णविनिर्मितम् ॥ काचिद्गृह्यास्थिताभ्यर्णेस्वर्धुनी
वारिसंभृतम् ॥ ३९ ॥ पीयूषापूरितंपात्रंसंगृह्यचापरास्थिता ॥ काश्चिन्नृत्यविशेषेणतोषयासासुरीश्वरम् ॥ ४० ॥ काचिद्गानेनरम्येणवाद्यैरन्यांसुशो
भनैः ॥ एवंवैभवमालोक्यचित्रन्यस्तइवाभवत् ॥४१॥ किमेतत्केनपुण्यस्यप्राप्तोऽयंवैफलोदयः ॥ भ्रांतिर्ममाद्यसंजाताइतिसंचिंतयन्स्थितः ॥ ४२ ॥
नतत्स्मरामिमत्कृत्यंयेनाहंप्राप्तवानिदम् ॥ इतिसंशयमापन्नंविष्णुभृत्यौतमूचतुः ॥ ४३ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येविष्णुदूतागमनं
नामद्वाविंशोऽध्यायः ॥२२॥ विष्णुदूताऊचुः ॥ प्रभोप्रयाहिवैकुंठंचिरंकिमिहतिष्ठसि ॥ सार्ष्टिमुक्तिस्त्वयालब्धामास्तुतेसंशयोहृदि ॥१॥ देवउवाच॥
अहोज्ञानादथाज्ञानान्नेतुंमांवामिहागतौ ॥ बहूनिममकर्माणिसंतिभोगर्हितात्मनः ॥ २ ॥ केनमेनिष्क्रयोजातःसहसोदयकर्मणाम् ॥ नाचेष्टंविद्यतेकर्म
नमयाहिकृतंपुरा ॥ ३ ॥ यावत्योवर्षतोधारास्तृणानिभुविपांसवः ॥ द्युभासोगगनेदेवौतावत्पापानिसंतिमे ॥४॥ किमेतद्दृश्यतेचित्रंमंडपंहरिसुंदरम् ॥
नयातिप्रत्ययोमह्यंवैकुंठभुवनंप्रति ॥ ५ ॥ इतिवाचमुपाकर्ण्यविष्णुदूतावथोचतुः ॥ नाथनाथकिमेतत्तेह्यज्ञानंसाधनंकुतः ॥ ६ ॥ श्रीविष्णोराज्ञयात्वां ॥२२॥
वैनेतुमत्रसमागतौ ॥ विष्णुप्रियोमहापुण्योनाम्नायःपुरुषोत्तमः ॥७॥ यस्मिंस्त्वयातपश्चीर्णंयदलभ्यंसुरैरपि॥अविज्ञातंमहाराजकपिदेहेनयत्कृतम् ॥८॥

परोक्षंकाननेकृत्यंतदानंत्यायकल्पते ॥ निरुपाधिप्रियोविष्णुःपरोक्षंहरिवल्लभम् ॥ ९ ॥ मुखरोगमिषेणैवनाहारमकरोद्भवान् ॥ कापेयचापलत्वे
नफलान्युत्कृत्यवृक्षतः ॥ १० ॥ क्षिप्तानिधरणीपृष्ठेतृप्तास्तैरितरेजनाः ॥ फलंमूलंतथापर्णंनत्वयाभक्षितंक्वचित् ॥ ११ ॥ पानीयमपिनोपीतमेतत्तेदुश्च
रंतपः ॥ परोपकारश्चसुमहान्कृतस्तेफलदानतः ॥ १२ ॥ शीतवातातपारौद्राःसोढाविचरतावने ॥ महातीर्थवरेरम्येत्र्यहमाप्लवनंकृतम् ॥ १३ ॥ तवकृ
त्यस्यलक्षांशंकोटचंशमपिकश्चन ॥ करोतिनरशार्दूलसोऽपिविष्णुपदंव्रजेत् ॥ १४ ॥ किंपुनस्तवकृत्येनमुक्तिर्भवतिशाश्वती ॥ यस्त्वयासाधितःस्वार्थो
नान्यःकर्तुंक्षमःक्षितौ ॥ १५ ॥ नविज्ञातःकथंदेवप्रभावःपुरुषोत्तमः ॥ यस्मिन्नेकोपवासेनमुच्यतेकोटिकिल्बिषैः ॥ १६ ॥ नानेनसदृशंपुण्यमस्तिलो
कत्रयेऽपिच ॥ नैतत्तुल्यंशुभंचित्तंनैतत्तुल्यंहरिप्रियम् ॥ १७ ॥ तेधन्याःकृतपुण्यास्तेतएवभुविमानवाः ॥ नाविज्ञातोगतोयेषांमासःश्रीपुरुषोत्तमः ॥ १८ ॥
सफलंजीवितंतेषांसफलाश्चपरिक्रियाः ॥ ब्रह्मचर्यादिवृत्तानिश्रुतान्यध्ययनानिच ॥ १९ ॥ दानानिपितृकार्याणिसौराणिक्रतवोऽमलाः ॥ दुर्लभंमानुषं
जन्मभूखंडेभारतेशुभे ॥ २० ॥ येषांसर्वोत्तमोमासःस्नानदानजपैर्गतः ॥ सर्वसाधनभूयिष्ठोवैष्णवःपुरुषोत्तमः ॥ २१ ॥ धिगसौपापकोरौद्रःपापकार्ये
जितेन्द्रियः ॥ विष्णुप्रियतमेमासेसत्क्रियावर्जितश्चयः ॥ २२ ॥ इतितद्वर्णितंविष्णुदूताभ्यामनुभूयसः ॥ अत्यंतचकितोहृष्टःपुलकांचितसद्वपुः ॥ २३ ॥
तीर्थदैवतमामंत्र्यगिरिंकालंजरंततः ॥ वनदेवींवनस्थांश्चसर्वान्गुल्मलतातरून् ॥ २४ ॥ ततःप्रदक्षिणीकृत्यविमानंसुरदुर्लभम् ॥ समारुह्यचतुर्बाहुर्दि
व्यवपुषालसन् ॥ २५ ॥ पश्यत्सुसुरवृंदेषुनानालेखगणार्चितः ॥ नानावादित्रनिनदैःकुसुमासारवीजितः ॥ २६ ॥ साकंजयारवैरुच्चैर्वेष्टितःप्रमदाजनैः ॥
स्वर्गसीमंतिनीलौल्यकारिसद्रूपसंपदा ॥ २७ ॥ रोचन्वैविबुधाँल्लोकांश्चतुरापांगवीक्षितः ॥ सेंद्ररुद्रादिभिर्देवैःसम्यक्चपरिपूजितः ॥ २८ ॥ जगाम
नित्यधिष्ण्यानियद्विष्णोःपरमंपदम् ॥ यद्गत्वातीवमोदंतेशुद्धाःसंन्यासिनोऽमलाः ॥ २९ ॥ नयत्रकालचक्रस्यभयंनचजराप्तातिः ॥ नशोकोनचमात्सर्यं
नाधिर्व्याधिःकलिर्भ्रमः ॥ ३० ॥ नमोहोनाशुभाबुद्धिर्नार्तिर्लोभगदादयः ॥ नतमोनरजःसत्वंताभ्यांमिश्रःप्रवर्तते ॥ ३१ ॥ तत्रासौचित्रकोविप्रस्त्य
क्त्वाकपिवपुःक्षणात् ॥ अवाप्यविपुलंसौख्यंरेमेनारायणात्मनः ॥ ३२ ॥ सूतउवाच ॥ एवंवृत्तांतमात्रेणपुरावृत्तंयथाद्विजाः ॥ निवेदितंत्वयापृष्टंतवभार्ग
वनंदन ॥ ३३ ॥ एवंप्रभावोमासस्यविप्रेशपुरुषोत्तमः ॥ किंतेनजायमानेननार्चितोयेनवैहरिः ॥ ३४ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येचित्रक
स्यवैकुंठप्राप्तिवर्णनंनामत्रयोविंशतितमोऽध्यायः ॥ २३ ॥ छ ॥ सूतउवाच ॥ त्रिदिवस्थाःप्रशंसंतिसर्वेदेवाःसवासवाः ॥ केनचित्पुण्ययोगेनमानुषं
जन्मलभ्यते ॥ १ ॥ सर्वसाधनसम्पन्नेऽजनाभेखण्डनायके ॥ तर्हिसर्वात्मनामासंसेवयामोहरिप्रियम् ॥ २ ॥ हरिलोकप्रदंपुण्यमंजसापुरुषोत्तमम् ॥ ईदृशं

मानवामासंनार्चयंतिगतान्हियः ॥ ३ ॥ कथंमुक्ताभविष्यंतिमृत्युजन्मभवाद्विजाः ॥ नचपुत्रसुखंतेषांनचमुक्तिःकदाचन ॥ ४ ॥ यातंयातंप्रकुर्वंतिकूपकुं
भभ्रमिर्यथा ॥ विमानगायविप्रायचित्रकायमहात्मने ॥ ५ ॥ पुनरूचतुरन्योन्यंप्रेम्णामासस्यसद्विधिम् ॥ हरेर्दूतौगच्छमानौतद्गाथाकृतमानसौ ॥ ६ ॥
अस्मिन्मासेद्विजश्रेष्ठनासद्वस्त्राणिधारयेत् ॥ नपिबेत्परपानीयंनस्नायात्परवारिणा ॥ ७ ॥ नस्वपेत्परशय्यायांनचसेवेत्पराग्निकम् ॥ परान्नंनोपभुं
जीतनकुर्वीतपरक्रियाः ॥ ८ ॥ परकीयान्नसेवेतवस्त्रोपानत्कमंडलून् ॥ नार्चयेद्देवताःसर्वाधियाविषमयाक्वचित् ॥ ९ ॥ परापवादान्नब्रूयाच्छृणुयान्ना
नृतंवदेत् ॥ सर्वान्नंनोपभुंजीतशक्तश्चेत्तद्धुपोषणम् ॥ १० ॥ वित्तशाठ्यमकुर्वाणोधनंदद्याद्विजातये ॥ विद्यमानेधनेदौस्थ्यंकुर्वन्निरयगर्भगः ॥ ११ ॥
नित्यंनित्यंद्विजेंद्रेषुदत्त्वाभोजनमुत्तमम् ॥ भुनक्तिशेषमात्रंचतस्यपुण्यफलंशृणु ॥ १२ ॥ ब्रह्मांडंतर्पितंतेनयेनविप्रात्मकोहरिः ॥ तोषितःश्रद्धया
विप्रपूजनाच्छादनाशनैः ॥ १३ ॥ मोदकैर्मधुरैर्नानाभक्ष्यैस्तांबूलवीटकैः ॥ वस्त्रैरुच्चावचैर्भोगैःसुगंधैश्चंदनैःशुभैः ॥ १४ ॥ कर्पूरागुरुकस्तूरीकुंकुमै
रर्चयेद्द्विजान् ॥ एवंयैरर्चिताविप्रामासेऽस्मिन्पुरुषोत्तमे ॥ १५ ॥ स्वर्णभारसहस्रस्यदत्तेयत्फलमाप्नुयात् ॥ प्रत्यहंराजसूयस्यवाजिमेधसवस्यच
॥ १६ ॥ सदक्षिणंफलंलब्धमंजसैवद्विजेश्वर ॥ किंचिदप्यधिकंमासिकुर्वतांपुरुषोत्तमे ॥ १७ ॥ विष्णुर्वदतिविप्रेभ्योमत्प्रियोनास्तिकश्चन ॥ मासेनाने
नसदृशःसत्यमेतन्नचान्यथा ॥ १८ ॥ धन्यास्तेपुरुषालोकेयेनित्यंपूजयंतिमाम् ॥ नतेधन्याःकदाचित्स्युर्मासिपूजनवर्जिताः ॥ १९ ॥ मासस्यैतस्ययये
भक्तास्तेयांतिपरमांगतिम् ॥ तेषांमुक्तिप्रदःसाक्षादहंतिष्ठामिपार्श्वतः ॥ २० ॥ तस्माद्भजतमेभक्ताःपवित्रंपुरुषोत्तमम् ॥ लोकानंत्यप्रदातारंजन्ममृ
त्युनिवारकम् ॥ २१ ॥ इंद्रद्युम्नःशतद्युम्नोनहुषश्चभगीरथः ॥ मनोरथसमुद्रांतमीयुरन्येप्यनेकशः ॥ २२ ॥ मंत्रराजमिमंविप्रशृणुतेवच्मिदुर्लभम् ॥
अन्यैरितोपियच्छ्रुत्वामुच्यतेभ्रूणहत्यया ॥ २३ ॥ नमोभगवतेवासुदेवायमहत्याश्रद्धयायुतः ॥ २४ ॥ यद्वानारायणायेतिनमःप्रणवपूर्वकम् ॥ अथवा
नमोविष्णवेतिजपेत्प्रणवपूर्वकम् ॥ २५ ॥ यद्वापंचाक्षरोजापःकार्यःश्रद्धासमन्वितैः ॥ यस्मिञ्छ्रद्धाभवेद्यस्यतेनैवतोषयेत्प्रभुम् ॥ २६ ॥ लक्षमेकंजपे
देनंमासेस्मिन्ममवल्लभम् ॥ श्यामाःश्वेतामधुतिलाजुहुयान्निर्जराननने ॥ २७ ॥ तर्पणंब्रह्मभोज्यंचजपंकुर्याद्दशांशतः ॥ मंत्रंजपेद्दषिर्देवश्छंदोबीजान्वितं
सदा ॥ २८ ॥ न्यासेनविनियोगेनजप्तश्चेत्किल्बिषापहः ॥ षडंगेषुन्यसेन्मंत्रंप्रणवाक्षरसंयुतम् ॥ २९ ॥ एवंजपँल्लभेज्जीवोह्यंजसाभवमोचनम् ॥ चतुर्वर्गं
लभेद्धीरोह्यनायासेनसर्वथा ॥ ३० ॥ सदाध्यायेदिदंरूपंश्यामवर्णंचतुर्भुजम् ॥ शंखचक्रगदापद्मजुष्टंभुवनभूषणम् ॥ ३१ ॥ लभेतसकलान्कामान्विशे
षात्पुरुषोत्तमे ॥ द्विजराजप्रवक्ष्यामितुभ्यंविधिमहंशृणु ॥ ३२ ॥ नेदंकस्यापिकथितंकदाचिदपिभूसुर ॥ श्रोतव्यमेतत्सततंपुराणमृषिसंस्तुतम् ॥ ३३ ॥

यत्पदश्रुतिमात्रेणनश्यंतिपापराशयः ॥ गंगादिसरितःश्रेष्ठाःसर्वतीर्थानिसागराः ॥ ३४ ॥ नैमिषादीन्यरण्यानिहिमालयमुखानगाः ॥ कूपाःकुंडानिगर्त्ता
श्चपल्वलानिसरांसिच ॥ ३५॥ सुरायतनमुख्यानितीर्थानिविविधानिच ॥ सुरारामाःसुरम्याश्चसर्वकिल्बिषकृंतनाः ॥३६॥ तेषुसर्वेषुसुस्नातःसर्वयागकरः
सच ॥ विद्याव्रततपःस्नाताःश्रुत्वाख्यानमिदंभवेत् ॥ ३७ ॥ जन्मनामनुमिमंविप्रकोटिजन्मकृतापहम् ॥ मुच्यतेनात्रसंदेहःसत्यंसत्यंपुनःपुनः ॥ ३८ ॥
॥ सूतउवाच ॥ द्विजेशएतच्चरितंनिशम्यद्विजोत्तमःप्रीतमनाबभूव ॥ विमानमारुह्यजगामविष्णोःसारूप्यमासाद्यहरेर्निवासम् ॥ ३९ ॥ निरंतरंश्राव्यमिदं
पुराणमत्यंतशुद्धिंपठितंप्रयच्छेत् ॥ धर्मार्थकामानपुनर्भवंचयच्छेतवाक्छुद्धिमतुल्यरूपाम् ॥ ४० ॥ धन्यंयशस्यंसुखपुत्रपौत्रारोग्यप्रतापाद्भुतवां
छितंच ॥ आयुष्यमोक्षंकुलबुद्धिमुग्रांददातिलोकंप्रचुरंद्विजेशाः ॥ ४१ ॥ श्रुत्वेतिविप्राःकिलशौनकाद्याःसूतंतदोचुर्विनयानतास्ते ॥ धन्योऽसिधन्यो
ऽसिचिरंतनोऽसिजगत्पवित्रीकरणोऽसिसूत ॥४२॥ यथैवविष्णोर्जगदार्तिहारिनामत्वदीयंचतथैवसूत ॥ त्वंनोगुरुःपूज्यतमश्चविष्णोर्भक्तिप्रदस्त्वंकिमुते
वदामः ॥ ४३ ॥ तवास्तुकीर्तिर्जगतिप्रशस्ताछंदांसियावद्धिततानिवीर ॥ तावत्प्रतापोऽस्तुतवोग्रतेजसस्तवानृणानोवयमत्रजातु ॥ ४४ ॥ तवाननो
द्गीतहरिप्रधानश्लोकाक्षराणांप्रतिकोटिदानैः ॥ स्यामोऽनृणावापिसमुद्रनेमिप्रदासुराणामपिराज्यदानात् ॥ ४५ ॥ प्रयाहिमाविस्मरनोमनोज्ञवयंचतेप्री
तमनाभवामः ॥ संदर्शनंतेनिमिषेणसाधोसुखेनगच्छस्वचिरागमाय ॥ ४६ ॥ इत्याशिषःसप्रतिगृह्यधीमान्प्रदक्षिणावर्त्तनजातहर्षः ॥ नत्वाजगामाशुध
रासुरेशान्स्वधामविप्राश्चकिताःस्मतस्थुः ॥ ४७ ॥ अहोकिमेतत्कथितंद्विजेंद्रावरिष्ठमाख्यानमिदंपुराणम् ॥ मासस्यदिव्यंपुरुषोत्तमस्यमाहात्म्यमं
ग्र्यंजगदार्तिहारि ॥ ४८ ॥ इतिश्रीपद्मपुराणेपुरुषोत्तममाहात्म्येनियमनिरूपणंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ संपूर्णमिदमधिकमाहात्म्यम् ॥

इदं पाद्मपुराणान्तर्गतं पुरुषोत्तममासमाहात्म्यं खेमराज श्रीकृष्णदास-इत्यनेन

मुम्बय्यां-स्वकीये "श्रीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाशितम् ।

संवत् १९५३, शके १८१८, सन् १८९६.

॥ इति श्रीपाद्मपुराणांतर्गतपुरुषोत्तममासमाहात्म्यं समाप्तम् ॥